1052

॥अथस्मार्तप्रायश्चित्तानि॥
पत्रसंख्या ५८

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

॥श्रीगणेशायनमः॥निर्विघ्नमस्तु॥अथस्मार्त्तप्रायश्चित्तानिलिख्यंते॥तत्रादौ
वक्ष्यकविशेषोनित्यप्रायश्चित्तानिचवक्ष्यंते॥तत्रादौशौचमह मनुः॥शौचेय
त्नः सदाकार्यः शौचमूलोद्विजः स्मृतः॥शौचाचारविहीनस्यसमस्तानिष्फलाःक्रि चा
याइति॥तदेतद्द्विविधं॥स्मृत्यर्थसारे॥शौचंचद्विविधंप्रोक्तंबाह्यमाभ्यंतरंतथा॥
मज्जलाभ्यांस्मृतंबाह्यंभावशुद्धिस्तथांतरमिति॥तदुद्दंतशुद्धिंचकुर्यादितिया
ज्ञवल्क्यः॥प्रातःस्नानंतुस्मृत्यर्थसारे॥स्नानमूलाःक्रियाःसर्वाःश्रुति स्मृत्यादितान्न
णां॥अस्नातश्चपुमान्नार्हेज्जपहोमादिकर्मसिति॥प्रातःस्नानाकरणेप्रत्यवायःस
एवाह।सप्तरात्रंप्रातस्नायीद्विजःशूद्रत्वमाप्नुयात्॥अतएवसदास्नायादशक्तश्चेद्वे रां॰
दिनइति।तन्मुख्यनद्यादाविति विज्ञानेश्वरः॥अथाशक्तादीनांसएवाह।वाप्यांकू १

पेतडागेवापरक्षेवोष्णवारिणिप्रातःस्नानंसदाकुर्योदुष्णेनैवसदातुरइतिातथा॥
नित्यमुष्णोदकैःस्नायात्काम्यनैमित्तिकारतेइतिसंग्रहवचनमप्यशक्त
परं॥एतदशक्तोमंत्रस्नानादिवाकुर्यात्॥प्रातःस्नानंसंक्षेपेणकर्त्तव्यंसाग्निकैः
।अल्पत्वाद्धोमकालस्यबहुत्वात्स्नानकर्मणः॥प्रातःसंक्षेपतःस्नानंहोमाद्यर्थंतदि
ष्यतइतिकात्यायनोक्तेः॥सौभाग्यवतीभिरप्युक्तंस्नानंकाम्यनैमित्तिं स्मृत्यर्थसा
रः॥अथसंध्याकाळः।आश्वलायनगृह्ये॥अर्द्धास्तमितेमंडलआनक्षत्रदर्शनादेवंप्रा लो
तःप्राङ्मुखस्तिष्ठन्नामंडलदर्शनादिति।तत्रापित्रिविधत्वमुक्तंधर्मसारेऽधा
निधौ॥उत्तमासूर्यसहितामध्यमालुप्ततारका॥कनिष्ठातारकोपेतासायंसंध्यात्रि
धामता॥तथा।उत्तमा तुसनक्षत्रामध्यमालुप्ततारका॥कनिष्ठासूर्येसहितापा

कंविनाकर्त्तव्यमिति५

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

तः संध्यात्रिधामतेतिमुख्यएवायंकालः॥ गौणकाळस्त्वसोत्तरमुदयेंत्रिदंडात्मकः। सायंसंध्यात्रिघटिकाअस्ताद्उपरिभास्वतइतिनिर्णयसिंधौस्कांदोक्तेः। एतत्काळातिक्रमेप्रायश्चित्तपूर्वकंसंध्यांकुर्यात्॥ तथाचस्मृत्यंतरे॥उदयाद्घटिकास्तिस्रःप्रातःसंध्यामुपासितुं॥सायमस्तमयाद्ऊर्ध्वंमध्याह्नेद्वादशोर्ध्वघट्॥संध्याकाळस्त्वयंप्रोक्तोनिष्कृतिस्तुदतिक्रमे॥विधेयाविधिमार्गेणततः फलवतीक्रियाधाने॥यदा दीक्ष्येजपेन्मंत्रंदत्तावारंदिनेदिने॥अकालेनित्यकर्मोणियथाकालेकृतानिहि ॥तामेवाहयमः॥संध्याकाळेत्वतिक्रांतेस्नात्वाचम्ययथाविधि॥जपेदष्टशतंदेवीततःसंध्यांसमाचरेत् इति॥तथाचस्मृत्यंतरेभरद्वाजः॥प्राणायामत्रयंप्रातर्द्विगुणंसंगवेस्मृतं॥मध्याह्नेत्रिगुणंप्रोक्तंपराह्णेतुषडुणं॥सायाह्नेद्वादशगुणं

तरं
क्रिया
का
रो॰
२
म

स्यर्क्षत्यांततोव्रजेदिति॥ तथाचगौतमस्मृतौ॥काळातिक्रमणेचैवत्रिसंध्यास्वपिसर्वदा॥चतुर्थार्घ्यंप्रकुर्वीतत्रिरोव्याहृतिसंपुटं॥यद्वा॥चतुर्थार्घ्यंतुसावित्र्याद्यव्याहृतिसंपुटं॥कालातीतविशुध्यर्थंत्रिसंध्यास्वपिनित्यशइति॥एकाद्यतिक्रमेतुजमदग्निः॥एकांसमतिक्रम्यप्रमादाद्यदिकुर्यादि॥अहोरात्रोषितोभूत्वागायत्र्याश्चायुतंजपेत्॥द्विरात्रेद्विगुणंप्रोक्तंत्रिरात्रेगुणंस्मृतं॥त्रिरात्रात्परतश्चैवमशक्तएवमाचरेदिति॥अत्रस्यादिनाकालोपेतुसएवाद्यःसंध्याकाळतःप्राप्तमालस्यादतिवर्त्तते॥स्यर्क्षत्यामवाप्नोतिउल्लूकत्वमवाप्नुयात्॥तथा॥राक्षसोभेनरपक्षोभेरोगान्नौक्षयसप्तके॥संध्यावदनविच्छित्तिर्नदोषायकथंचन॥सप्तकेमृतकेचैवसंध्याकर्मनसंत्यजेत्॥मनसोच्चारयेन्मंत्रान्प्राणायामंविवर्जयेत्॥काळातिक्रमेपि

त्रि

दोषाभावनिमित्तानिसएवाह॥देवाग्निद्विजदेवानांकार्यंमहतिसंस्थिते॥संध्यादीने
नरोक्तियेनतत्पुण्यसाधनमिति॥स्मृत्यर्थसारेतु॥संध्यात्रयलोपेत्वष्टसहस्रमितां
सावित्रींजपेदित्युक्तं॥अत्यग्न्योस्तुसन्ध्यांतरेप्रतिसंध्याकाललोपेगायत्री शतं
शतंवाजप्येत्युक्तमस्तीत्यलं॥संध्योत्तरंब्रह्मचारीअग्निकार्यंकुर्यात्॥अग्निकार्यंवि
नाभोजनेप्रायश्चित्तमग्निधाने॥मानस्तोकेजपेन्मंत्रंशतवारंशिवालये॥अग्निकार्यं
विनाक्षुद्रेनपापंब्रह्मचारिणइति॥स्मृत्यर्थसारेतु॥संध्या ग्निकार्यलोपेस्नात्वा
ष्टसहस्रंगायत्रीजपउक्तः॥भिक्षालोपेष्टशतमित्यमत्यापरित्यागेतुयाज्ञवल्क्यः॥भै
क्ष्याग्निकार्यस्वकृतुसन्नरात्रमनातुरः॥कामवकीर्णइत्याभ्यांजुहुयादाहुतिद्वयं॥ रांम॰
उपस्थानंतथाकुर्यात्समाप्तिंचत्वनेन हीतिमंत्रौ तुमिताक्षरायामुक्तौ॥अत्य ग्नौक्तौ ३

ति३

क्तविधाने॥तंवोधियाजपेन्मंत्रंलक्षमेकंशिवालये॥ब्रह्मचारीस्वधर्मेषुन्यूनंचेत्स्
र्णमेतत्इति॥ ॥प्राड्मुखरणकालः॥पुरादित्यास्त मयात्पुरादित्यस्योदयादिति
बोधायनोक्त्वाद्विदरणानंतरमस्तमयादयोयथाभव तत्तथाविदरेत्॥तथाअ
धिवक्षेस्यैअविःसूर्यंचेत्यापस्तंबसूत्रेचोक्तंउदयास्तमयात्पूर्वंमुदरणस्यकाळइ
तिनिष्कर्षार्थः॥एतत्प्राड्मुखरणकालातिक्रमेउक्तप्रायश्चिताभावात्सर्वप्रायश्चित्त
मेवकार्यं॥तद्यथा॥होमकाळे अस्तमयोदयात्पूर्वंप्राड्मुखरणनिमित्तपूर्वकंसायं
प्रातर्वाहोमंकरिष्यइतिसंकल्प्य॥होमद्रव्यसंस्कारात्पूर्वंसंस्कृताज्येनऊंभूर्भुवःस्वः
स्वाहेतिसर्वप्रायश्चित्तंस्रुवेणकृत्वाहोमद्रव्यसंस्कारादिप्राप्तंकाळहोमंकुर्यात्॥अ
थहोमकाळः॥दीपे॥अग्नेर्होमस्योदयानंतरमस्तमयानंतरं चमुख्यः सायंप्रहोमो

होत्र एणकर४

तोवा

तःप्रातःसंगवोमुख्यःकालइतिवतौच॥गौणस्तु॥सायंहोमस्यनिशासर्वागौणका
ळःप्रातर्होमस्यसर्वमेगौणकालः॥आप्रातराकृतिकाळःसायमाकृतिकाळोनातीया
दासायमाकृतिकाळात्प्रातराकृतिकाळइतिबोधायनसूत्रोक्तेः॥प्रदोषांतस्तु॥रज
न्याःसायमाद्यचतुर्थोभागप्रदोषः॥दिवसस्याद्यचतुर्थोभागःसंगवइतिदीपेउक्तं॥
आश्वलायनश्रौतसूत्रेतु॥प्रदोषांतोहोमकालःसंगवांतःप्रातःअत्रप्रदोषांतोनामा
ष्टौनाडिकाइतिफलितोऽर्थइतिदीपेउक्तं॥तथासायमस्तमितेहोमकालस्तुनवना
डिकेतिस्मृत्यर्थसारोक्तेश्च॥तथा॥संगवांतःप्रातरित्यत्रसंगवांतोदशनाडिकेतिना
रायणवृत्तिः॥अस्तमितेउदितेचविहितोहोमएतावतिकालेक्रियमाणोनातीतोभव रांम·
तीतिवृत्ताउक्तेःपुनःपुनःकालविधिःतमतिनीयचतुर्गृहीतमाज्यंजुहुयादिति॥श्रौ ४

४ ततोहौम्यद्रव्यसंस्काराद्दिहोमंसमापयेत्॥एवंप्रातरपिउक्तहोमकालातिक्रमनिमि॰कंप्रातरौपा॰पू
र्ववच्चतुर्गृहीत्वाप्रातर्वस्तर्नमःस्वाहा॥अग्नयइदं॥४

तस्त्रेउक्तहोमकालातिक्रमेप्रायश्चित्तपूर्वकंगौणकालेहोमंकुर्यात्॥तत्प्रयोगश्च
॥उक्तहोम कालातिक्रमनिमित्तप्रायश्चित्तपूर्वकंसायमौपासनहोमंकरिष्यइतिसंक
ल्प्य॥हौमद्रव्यसंस्कारात्सर्वमाज्यंसंस्कृत्यस्रुचिचतुर्वारंगृहीत्वासायंदोषावस्तर्न
मःस्वाहाॐअग्नयइदं॰॥ततःपूर्ववद्धोमंकुर्यात्॥अथहोमाधिकारिणः॥स्मृत्यर्थ
सारे॥होमेमुख्यायजमानः पत्नीपुत्रश्चकन्यका॥ऋत्विक्त्रिष्वेगुरुर्भ्राताभागि
नेयःसुतापतिः॥एतैरेवदुतंयच्चतदुतंस्वयमेव त्विति॥तत्रापियजमानतत्पत्न्य
नुज्ञयातत्समक्षएवऋत्विगादीनांहोमादावधिकारःसएवार्थः॥असम क्षेतुदंप
त्योर्होतव्यंनत्विगादि नाहूयोरप्यसमक्षंचेद्धुतमनर्थकमिति॥उन्मादादावनुज्ञा
विनैवहोमादिकंकुर्यात्॥उक्तंचस्मृत्यर्थसारे॥उन्मादेप्रसवेचतौकुर्वीतानुज्ञ

यावि ना॥ नोपवासीप्रवासे स्यात्यंत्नीधारयतेव्रतं॥सर्वथायजमानोदित्यजेत्त॥
दिज्मुखः शुचिरिति॥ अथव्याधादिभिः निमित्तकं कर्मसुसंकल्पादिप्रयोगः॥ स्थष्टी
क्रियते॥एवंगुणेत्यादिमम व्याधित्वपरिहारार्थंषड्डाकृतिचरुहोमंकरिष्यइतिसं
कल्प्योपासनाग्निंसमिध्यप्राणानायम्यास्मिन्नन्वाहितेग्नावित्यादिचक्षुषीआज्येने
त्यंतमुक्त्वापंचवारंइंद्राग्नीप्रधानदेवतेचरुद्रव्येणश्वेषेणस्विष्टकृतमित्यादिस
ङ्घोयस्यइत्यंतेसमिद्वयमग्नावाधायपरिसमूहनादिपूर्णपात्रनिधानांतंकृत्वाप्रत्यग
ग्नेःपवित्रवति स्रुवेतस्मींचतुरश्चतुरोमुष्टीन्निरूप्यतत्संख्ययातथैवप्रोक्ष्यावघाता
ज्यभागांतंकृत्वावरानधर्मेणचरुमवदाय॥मुंचामित्येतिपंचचस्यसक्रुत्स्यप्राजा रांम॰
पत्योयक्ष्मनाशनऋषिः॥इंद्राग्नीदेवते॥त्रिष्टुप्छंदः॥अंत्यानुष्टुप्॥राजयक्ष्मनाशा ५

नप्रधानचरुहोमेविनियोगः॥ॐमुंचामित्याहविषाजीवनायकमज्ञातयक्ष्मादु
तराजयक्ष्मात्॥ग्राहिर्जग्राहयदिवैतदेनंतस्याइंद्राग्नीप्रमुमुक्तमेनंस्वाहा॥इंद्राग्नि
भ्यामिदंनममेतिसर्वत्रत्यागः॥एवमग्रेपि॥ॐयदिक्षितायुर्यदिवापरेतोयदिमृत्यो
रंतिकं नीतएव॥तमाहरामिनिर्ऋतेरुपस्थादस्यार्षमेनंशतशारदायस्वा०॥२॥इंद्रा
ग्निभ्यामिदं०॥ॐसहस्राक्षेणशारदेनशतायुषाहविषाहार्षमेनं॥शतंयथेमंशर
दोनयातीर्विश्वंस्यदुरितंस्यपारंस्वाहा॥इंद्राग्निभ्या०॥३॥शतंजीवशरदोवर्धमा
नःशतंहेमंतांछतमुवसंतान्॥शतमिंद्राग्नीसविताबृहस्पतिःशतायुषाहविषेमं
पुनर्दुःस्वाहा॥इंद्राग्निभ्यामिदं०४॥आहार्षंत्वाव्वित्वंपुनरागाःपुनर्नव॥सर्वांग
सर्वंतेचक्षुःसर्वमायुश्चतेविदंस्वाहा॥इंद्राग्निभ्यामिदं०॥५॥षष्ठंस्विष्टकृतंहुत्वे

तिकारिकोक्तैःस्विष्टकृदादिहोमशेषंसमापयेत्॥ज्वरादियुतस्तत्प्रागतोपिचेदंकु
र्यादितिवृत्तिः॥अथदुष्टस्वप्ननाशांतिः॥ममाशुभस्वप्नसूचितारिष्टपरिहारार्थमुप
स्थानरूपप्रायश्चित्तंकरिष्यइतिसंकल्प्य॥अद्यानोदेवसवितरितिमंत्रहयस्यऋ
ष्यादयः॥सवितादेवता॥अनुष्टुप्छंदः॥डुःस्वप्ननाशनार्थेसूर्योपस्थानजपे॰
॥ॐअद्यानोदेवसवितःप्रजावत्सावीःसौभगं॥परादुष्वप्न्यंसुव॥विश्वानिदेवस
वितर्दुरितानिपरासुव॥यद्भद्रंतन्नआसुव॥१॥यच्चगोष्वितिपंचर्चस्यत्रितऋ
षिः॥उषोदेवता॥पंक्तिश्छंदः॥डुःस्वप्ननाशनार्थेसूर्योपस्थाने॰॥यच्चगोषुदुष्वप्न्य॰
सुऊतयोवयुतय॥१॥निष्कंवाघाक्ष॰परिदास्यन्नेदसोवऊतयः॰॥२॥तदन्ना रोम॰
यतदपसेतं॰ऊतयः॥३॥यथाकलायधानाफं॰सन्नयामनेन॰॥४॥अजैष्माद्यास॰ ६
स्य

वयं॥उषोयस्मा॰ऊतयः॥५॥यद्वा॥योमेराजन्नित्यस्यगृत्समदऋषिः॥वरुणो
देवता॥त्रिष्टुप्छंदः॥डुःस्वप्ननाशनार्थेसूर्योप॰॥ॐयोमेराजन्यु ज्योवासरवावा
स्वप्नेभीयंभीरवेमह्यमह॥स्तेनोवायोदिप्सतिनोदकोवात्वंतस्माद्वरुणपाह्यस्मान्॥
अथक्षुज्जृंभादिनिमित्तदोषपरिहारार्थंजपंकरिष्यइतिसं॰ऐ
वमग्रेपि॥ममामनोन्न दर्शननिमित्तदोषपरिहारार्थंजपेदितिपापगंधाघ्राणे॥
तथाममकर्णेध्वन्युत्पन्ननिमित्तदोषपरिहारार्थंसूचक्षामंत्रजपंकरिष्यइतिसं॰
सूचक्षाअहमक्षीभ्यांभूयासंसुवर्चामुखेनसुश्रुत्कर्णाभ्यांमयिदक्षश्रुतंनिमित्त
बद्धकेषपीमंमंत्रं जपेत्॥अथागम्यागमनादिप्रायश्चित्तं॥अगमनीयागमनंतु
रजस्वलामार्यागमनंनिषिद्धतिथ्यादौस्वभार्यागमनंवेतिवृत्तिः॥ममभार्यारजस्व

लागमनजनितदोषपरिहारार्थंपुनर्मामैत्विंतिमंत्राभ्यामाज्याहुतीर्होष्यामीत्या
ज्यहोमपक्षेसमिदाधानपक्षेममेत्यादिपूर्ववद्ब्रह्मासमिधौहोष्यामीतिजपपक्षेतु
पूर्ववद्ब्रह्माजपंकरिष्यइतिसं॰॥स्वाहाकारपदंत्यक्त्वाजपेदितिवृत्तिः॥१॥ममाया
ज्ययाजननिमित्तकदोषपरिहारार्थंमित्ययाज्ययाजनेप्राय॰॥अ याज्योन्य
स्तमार्त्विज्यमितिनिर्दिष्टः॥२॥ममाभोज्यभोजननिमित्तकृतदोषपरिहारार्थमि
त्यभोज्यभोजने॥अभोज्यंलशुनादिगृंजिकान्नादिचेतिवृत्तिः॥३॥ममाप्रतिग्रा
ह्यप्रतिग्रहनिमित्तकदोषपरिहारार्थमित्यप्रतिग्राह्यप्रतिग्रहे॰॥अप्रतिग्राह्यंवि
प्रस्यादिअप्रतिग्राह्यंपुरुषद्व्यंचेतिवृत्तिः॥४॥ममचैत्ययूपोपघातनिमित्तक रं॰
दोषपरिहारार्थमितिचैत्ययूपोपघाते॰॥चैत्ययूपोपघातोग्निचयनस्य स्पर्शः॥५॥ ७

तेषुपंचसुनिमित्तेष्विदमेववक्ष्यमाणप्रायश्चित्तंकुर्यादितिवृत्तिः॥ॐपुनर्मामै
त्विंद्रियंपुनरायःपुनर्भगः॥पुनर्ब्रह्मणमैतुमांपुनर्ब्रह्मणमैतुमांस्वाहाअग्नयइ॰
ॐइमेयेधिष्ण्यासोअग्नयोयथास्थानमिदंकल्पंतां॥वैश्वानरोवाहधानोंतर्यछ
तुमेमनोहृदंतरममृतस्यकेतुःस्वाहा॥अग्नयइदं॰॥अथाव्याधितस्वापकाली
नौस्तमयनिमित्तककर्मणिप्रायश्चित्तेअव्याधितंचेत्स्वपंतमादित्योभ्यस्तमिया
द्ब्राह्मणउपविशान्नरात्रिशेषंभस्वोदितेकृतसंध्यःसूर्यमुपतिष्ठेत्॥तद्यथा॥मम
व्याधितस्वापकालीनादित्यास्तमयनिमित्तप्रत्यवायपरिहारार्थंसूर्योपस्थानरूपप्राय हारा
श्चित्तंकरिष्यइतिसंकल्प्य॥तिष्ठन्नेवार्कमुखोयेनसूर्येतिपंचर्चस्यसूर्यपुत्रो
मनुरृषिः॥सूर्योदेवता॥जगतीछंदः॥अस्तेस्वापप्रत्यवायपरिहारार्थंसूर्यो

पस्थानेवि०॥ॐयेनसूर्यज्योतिषाबा०मपड्ढ्वध्र्यंसुव॥२॥ॐविश्वस्यहिप्रेषितो०रतक्रतुं॥३॥ॐतन्नोद्यावापृथिवीतन्न०मसीमहि॥३॥ॐविश्वोंत्वासुमनसः०सूर्य॥४॥ॐमहिज्योतिर्बिभ्रतं त्वा०सूर्य॥५॥इतिपंचभिरुपतिष्ठेत्॥तथाऽकर्मश्रोतस्वापकालीनादित्योदयनिमित्तकप्रायश्चित्तं॥ममविहितकर्मश्रोतस्वापकालीनादित्योदयजनितपत्यवायपरिहारार्थंसूर्योपस्थानरूपप्राय०॥तिष्टेनूव॥यस्यतेविश्ववेतिचतस्रृणांसूर्यपुत्रोमितपाऋषिः॥सूर्योदेवता॥जगतीछंदः॥उदयेस्वापपत्यवायपरिहारार्थंसूर्योपस्थानेवि०॥ॐयस्यतेविश्वाभुवनानि०वस्यसोदिहि॥२॥शन्नोनवेचक्षसा०धेहिचित्रं॥३॥ओंअस्माकंदेवाउभयाय०दधातन॥३॥ॐयद्वोदेवाश्चकृम०निधेतने॥४॥चतसृभिरुपतिष्ठेत्॥उ

पतिष्ठेतविहितकर्मश्रोतस्यनेष्यतइतिकारिकायो॰न्त्याघकर्मणाश्रोतस्येतिवृत्तिः॥अथागारोपरिकपोतोपवेशनासूचितारिष्टनिरासार्थं॥कारिकायो॥रक्तपादःकपोताख्यआरण्योकःशुक्लच्छविःसचेच्छालांविशेच्छालासमीपंवाव्रजेद्यदि॥परिषेचनमन्वाधानादिपूर्ववत्॥देवाःकपोतसूक्तेनप्रत्यृचंजुहुयाद्घृतं॥तद्यथा॥ममागारोपरिकपोतोपवेशनासूचितारिष्टनिरासार्थं॥देवाःकपोतइतिसूक्तेनप्रत्यृचमाज्यहोमंकरिष्यइतिहोमे॥जपपक्षेतुदेवाःकपोतइतिसूक्तंजपंकरिष्यइतिसं०॥अग्निमुपसमाधायास्मिंन्वाहितेग्नावित्यादिचक्षुषीआज्येनपंचवारंविघ्वान्देवानाज्यद्रव्येणेत्यादिपूर्ववच्चक्षुष्यंतंकृत्वा॥देवाःकपोतइतिपंचर्चस्यसूक्तस्यकपोतऋषिःविश्वेदेवादेवता

स्मा॰ घा॰ जगतीछंदः॥अ गारोपरिकपोतोपवेशानस्-चितारिष्टपरिहारार्थमाज्ये
९ होमेवि०॥जपपक्षेजपेवि०॥एवमेवगृहसमीपागमनेपिनेयं॥ॐदेवाः
कपोतइषितोयदिच्छन्तोनिर्ऋत्याइदमाँगमा॥तस्माअर्चामकृणवामनिष्कृतिंशं
नोभवद्विपदेशंचतुष्पदे॥इतिमंत्रेणहुत्वापक्षात्स्वाहाकारंपठेत्॥विश्वेभ्योदेवे ठे
भ्यइदं०॥एवमग्रेपि॥ॐशिवःकपोतइषितोनोअस्त्वनागादेवाःशकुनोगृहेषु॥
अग्निर्हिविप्रोजुषतांहविर्नःपरिहेतिःपक्षिणीनोवृणक्तु॥स्वाहा॥ॐहेतिःपक्षि रां॰
णीनदभात्यस्माकाँक्षापदंकृणुतेअग्निधाने॥शंनोगोभ्यश्चपुरुषेभ्यश्चाकृमानो ९
हिंसीदिहदेवाः कपोतइतिहुत्वा॥पक्षात्स्वाहा॥ॐयदुलूकोवदतिमोघमेतद्यत्क
पोतःपदमग्नौकृणोति॥यस्यदूतःप्रहितएषतत्तस्मैयमायनमोअकृमस्त्वे॥हु

त्वाततःस्वाहा॥ॐऋचाकपोतंनुदतप्रणोदमिषंमदंतःपरिगान्नयध्वं॥संयोप
यंतोदुरितानिविश्वाहित्वानऊर्जंप्रपतात्पतिष्ठः॥इतिहुत्वाततःस्वाहाकारंपठेत्॥
अथधनार्थेद्यूतगमनेनिमित्तकर्मणितु॥ममधनाद्यर्थसिध्यर्थंवयमुत्वापथ
स्यतइतिघृत्वाचमाज्यहोमंकरिष्यइतिहोमपक्षेजपपक्षेतु॥वयमुत्वापथस्यत
इतिसूक्तजपंकरिष्यइतिसं०॥अग्निमुपसमाधायास्मिन्नन्वाहितेग्नावित्यादिपू
र्णंदद्यात्वारमाज्येनशेषेणेत्याज्यभागांते॥वयमुत्वेतिदद्यात्सूक्तस्यभरद्वाजऋ
षिः॥पूषादेवतागायत्रीछंदः॥अ ष्टम्यनुष्टुबर्थसिध्यर्थमाज्यहोमेवि०॥ॐव
यमुत्वापथ स्पतेरथंनवाज सातये॥धियंपूषं नयुज्महि॥हुत्वाततःस्वाहाका
रंपठेत्॥पू ष्णइदं०॥अभिनोनयंवसोरंघयतदक्षिणं॥वामंपतिंनयाऽ॥ॐअ

स्मा॰ पा॰ जगतीछंदः॥अ गारोपरिकपोतोपवेशानरू-चितारिष्टपरिहारार्थमाज्ये
९ होमेवि०॥जपपक्षेजपेवि०॥एवमेवगृहसमीपागमनेपिस्तेयं॥ॐदेवाः
कपोतइषितोयदिच्छन्दूतोनिर्ऋत्याइदमाजगाम॥तस्माअर्चामकृणवानिष्कृतिंशं
नोभवद्विपदेशंचतुष्पदे॥इतिमंत्रेणकृत्वापश्चात्स्वाहाकारंपठेत्॥विश्वेभ्योदेवे ठे
भ्यइदं०॥एवमग्रेपि॥ॐशिवःकपोतइषितोनोअस्त्वनागादेवाःशकुनोगृहेषु॥
अग्निर्हिविप्रोजुषतांहविर्नःपरिहेतिःपक्षिणीनोवृणक्तु॥स्वाहा॥ॐहेतिःपक्षि रां॰
णीनदभात्यस्मानाक्षुरपवृक्णुतेअग्निधाने॥शंनोगोभ्यश्चपुरुषेभ्यश्चाकृमानो ९
हिंसीदिहदेवाः कपोतइतिकृत्वा॥पश्चात्स्वाहा॥ॐयदुलूकोवदतिमोघमेतद्यत्क
पोतःपदमग्नौकृणोति॥यस्यदूतःप्रहितएषतत्तस्मेयमायनमोअस्तुमृत्यवे॥कृ

त्वाततःस्वाहा॥ॐऋचाकपोतंनुदतप्रणोदमिषंमदंतःपरिगान्नयध्वं॥संयोप
यंतोदुरितानिविश्वाहित्वानऊर्जंप्रपतात्पतिष्ठःइतिकृत्वाततःस्वाहाकारंपठेत्।
अथधनार्थेद्यूतगमनेनिमित्तकर्मणितु॥ममधनाद्यर्थसिध्यर्थंवयमुत्वापथ
स्पतइतिप्रत्यृचमाज्यहोमंकरिष्यइतिहोमपक्षेजपपक्षेतु॥वयमुत्वापथस्पत
इतिसूक्तजपंकरिष्यइतिसं०॥अग्निमुपसमाधायास्मिन्नन्वाहितेग्नावित्यादिपू
र्णदर्वावारमाज्येनशेषेणत्याज्यभागांते॥वयमुत्वेतिदर्शार्चस्यसूक्तस्यभरद्वाजऋ
षिः॥पूषादेवतागायत्रीछंदः॥अ ष्टम्यनुष्टुबर्थसिध्यर्थमाज्यहोमेवि०॥ॐव
यमुत्वापथ स्पतेरथंनवाज सातये॥धियेषंनयुज्महि॥कृत्वाततःस्वाहाका
रंपठेत्॥पू र्णदं०॥अभिनोनर्यंवोवीरंप्रयतदक्षिणं॥वामंपतिनयाउ॥ॐअ

दित्संतंचिदाघृणेपूषंदानायचोदय॥पणेश्चिद्विम्रदामनः॥३॥ॐविपथोवाजसात
येचिन्नुद्विविमधोजहि॥साधंतामुग्रनोधियः॥४॥ॐपरिष्टंधिपणीनामारयाहृदया
कवे॥अथेमस्मभ्यंरंधय॥५॥ओंविपूषं नारयातुदपणेरिछहृदिप्रियं॥अथेम
स्मभ्यंरंधय॥६॥ॐअँरिरवकिकिराकृणुपणीनांहृदयाकवे॥अथेम०॥ॐयांपूष
न्ब्रह्मचोदनीमारांबिभर्ष्याघृणे॥तयासमस्यहृदयमारिरवकिकिराकृणु॥८॥यातेअ
घृणेऽोपशाघृणेपशुसाध नी॥तस्यास्तेसुम्नमीमहे॥९॥ॐउतनोगोषणिंधियँश्व म
सांवाजसामुत॥नक्रूणुहिवीतये॥इतिमंत्रोतेकृत्वापश्चात्स्वाहाकारांतेपूषाइ
दं॥त्यजेत्सर्वत्र॥१०॥अथनष्टलाभा र्थकर्मणितु॥मननष्टलाभार्थंसंपूषन्विदु रो॰
षेतिसूक्तेनघृत्यक्तमाज्यहोमंकरिष्यइतिसं०॥होमपक्षे॥जपपक्षेतुसूक्तंजपंक १२

रिष्यइतिविशेषः॥पूर्ववदग्न्याधानाद्याज्यभागांतेसंपूषन्विदुषेतिदशर्चस्यसूक्त
स्यभरद्वाजऋषिःपूषादेवतागायत्रीछंदः॥नष्टलाभार्थमाज्यहोमे०॥ॐसंपूष मे
न्विदुषानयोऽंजसानुशासति॥यएवेदमितिब्रवत्॥कृत्वाततःस्वाहेतिवदेत्सर्व
त्र॥पूस्मदंनममेतित्यागः॥ॐसमुपूस्मागमेमहियोगंदांअभिशासति॥इमएवेति
चब्रवत्॥२॥ॐपूस्मञ्चक्रंनरिष्यतिनकोशोवपद्यते॥नोअस्यव्यथतेपविः॥३॥
ॐयोअस्मैहविषाविधन्तंपूषापिमष्यते॥प्रथमोविंदतेवसु॥४॥ॐपूषागा
अन्वेतुनःपूषरक्षत्वर्वतः॥पूषावाजंसनोतुनः॥५॥ॐपूषन्ननुपूगाइहियजमा
नस्यसून्वतः॥अस्माकंस्तुवतामुत॥६॥ॐमाकिर्नेशन्माकींसंशा
रिकेवटे॥अथारिष्टाभिरागहि॥७॥इएवंतंपूषणंवयमिर्यमनष्टवेदसं॥ईशा

नंरायईमहे॥८॥ॐएषंतवब्रह्मतेवयं नरिष्येमकदाचन॥स्तोतारस्तइहस्मसि॥
९॥ॐपरिपूषापरस्ताद्धस्तंदधातुदक्षिणं॥पुनर्नोनष्टमाजतु इतिकृत्वाततः स्वाहेस्म
स्कापूष्णाइदं०॥१०॥पूज्ञाभ्रष्टत्वेतु॥पूज्ञाकामोहंसंपूषन्निति सूक्तेनघृत्यचमा
ज्यहोमत्यागोग्नाग्व जुपेद्धा॥अथयदाकदाचित्प्रवासंजिगमिषुःपित्पुत्रयोःगु
रुशिष्ययोश्चपथ्यभयेनगंतुंसूत्रोक्तःशिष्यातिसर्जनादिप्रयोगस्मृतिदर्शनासर्वैः
कर्त्तव्यइतिवृत्तिज्ञयंतौ॥तद्यथा॥शिष्याचार्यावाचम्यप्राणा नायम्यदेवाकालौ
कर्थं त्वामुकशर्मणःप्रेषितुंमार्गेसंभावितानेकभयनिरासार्थंशिष्यातिसर्जन
जारादिकरिष्यइतिसं०॥प्राङ्मुखआचार्योदगाननंशिष्यमुपवेश्यजपेत्॥ॐप्राणा
यानयोरुरुव्यचास्तयाप्रयच्छदेवायसवित्रेपरिददामिइत्कंभौजपित्वाततःॐमंदै

रितिमंत्रस्यविश्वामित्रऋंदोबृहती॥जपेविनियोगः॥ओमंदैरिंद्रहरि भिर्याहि
मयूररोमभिः॥मात्वाकेचिन्नियमन्विन्नपाशिनोतिधन्वेवतां इति॥ॐप्राक्स्व
स्तीत्कंभौचजपित्वा॥महित्रीणामितिऋचस्यसूक्तस्यवारुणिरादित्योगायत्री॥स्व
स्त्ययनार्थमुभाभ्यामन्योन्यमनुमंत्रेणशिष्यविसर्जनेविनियोगः॥ॐमहित्रीणा
मवोस्तुद्युक्षंमित्रस्यार्यमणः॥दुराधर्षंवरुणस्य॥नहितेषाममाचननाध्वसुवार
णेषु॥ईशेरिपुरघंसः॥यस्मैपुत्रासोअदितेःप्रजीवसेमर्त्यायाज्योतिर्यच्छसि
जस्रं इत्कंभावप्य न्योन्यमनुमंत्र्यविसृज्यप्रवासंगच्छेत्॥एवं मतिसृष्टस्यन
कुतश्चिद्भयंभवतीतिविज्ञायतइतिसूत्रोक्तेः॥एवंगुरुंविसृष्टंगच्छंतंपथिवृ
क्षेणोक्षियवाचोवदंतितदाकनिक्रददितिसूक्तद्वयस्यगृत्समदःशाकुतःआ

द्यस्यत्रिष्टुभःपरस्यजगतीमध्यमांतिशाक्वर्यष्टीव यसाममनोज्ञावचःश्रवणंच
पशाकुनिरासार्थजपेवि०॥ॐकनिक्रदज्जनुषंप्रब्रुवाणइयर्तिवाचमरितेव
नावं॥स्कंमंगलश्चशकुने भवोमात्वाकाचिदभिभाविष्याविदत्॥मात्वाश्येन
नउदधीन्मास्कपर्णोमात्वाविदद्शुमान्वीरोअस्ता॥पिशंगमनुप्रदिशंकनिक्र
दत्स्कंमंगलोभद्रवादीवदेह॥उवक्रंददक्षिणतोगृहाणांस्कंमंगलोभद्रवादीशकुंते
॥मानस्तेनईशतमाघशंसोरुदद्रुद्रमविद्धेस्कवीराः॥प्रदक्षिणिदभिगृणंतिकार
वोवयोवदंतऋतुथाशकुंतयः॥उभेवाचौवदतिसामगा इवगायत्रंचत्रैष्टु
भंचानुराजति॥उद्गातेवशकुनेसामगायसिब्रह्मपुत्रइवसवनेषुशंससि॥वयंव रा॰
वाजीश्रिश्रुमतीरपीत्यासर्वतोनःशकुनेभद्रमावदविश्वतोनःशकुनेपुण्यमावद १२

॥आवदंस्त्वंशकुनेभद्रमावदतूष्णीमासीनःस्कमतिंचिकिद्दिनः॥यदुत्यतन्वदसि
कर्करिर्यथाहृद्रुद्रमविद्धेस्कवीराः॥देवीवाचमितिमंत्रस्यनोमोभार्गवऋषिः
वागीश्वरीदेवतात्रिष्टुप्छंदः॥विनियोगःपूर्ववत्॥देवीवाचमजनयंतदेवास्तांवि
श्वरूपाःपशवोवदंति॥सानोमंद्रेषमूर्जंदुहानाधेनुर्वागस्मानुपसृष्टुतैतु॥२॥एत पाः
त्सूक्तद्वयस्ययात्राकाळेपिजपःकर्त्तव्यः॥कनिक्रदज्जपेत्सूक्तंयात्राकाळेविशेष
तइतिऋग्विधानोक्तेश्च॥तथा॥जातवेदसइत्येतांचस्वस्त्ययनार्थंसदापथिजपे
त्॥जातवेदसइत्येतां सदास्वस्त्ययनंजपेत्॥दुर्गेपथिप्रयातस्यनास्तिरिभ्योभ
यंभवेदिति ऋग्विधानोक्तेः॥ततःपथिगछन्यदामृगस्यशिवादीनांनिंदितांवा
चंशृणोतितदास्कंहिरुक्तमितिमंत्रस्यगृत्समदोरुद्रस्त्रिष्टुप्॥मृगारीनाममनो

ज्ञानिंदितावाचः स्रवणाद्यरिष्टनिरासार्थंजपेवि०॥ॐस्तादिक्रतंगर्तसदंयुवानं
मगन्नभीममुपहत्नुमुग्रं॥मलाजरित्रेरुद्रस्तवानोन्यंतेअस्मन्निवपंतुसेनाः॥
ततोयस्यांदिशियस्मात्पुरुषात्॥व्याघ्रादिभ्योविनायात्तांदिशंप्रत्यभयतोमार्गप्र
दीपमुल्मुकंक्षिप्त्वाप्रक्षिपेदनेनमंत्रेण॥ॐअभयंमित्रावरुणामहमस्मिचि
षाग्नात्रन् दहंतेप्रतीत्य माप्रज्ञोरंमाप्रतिष्ठांविंदेतमिथोभिंदानामुभयंतुम
त्कं॥अनेनमंत्रेणाभयतःक्षिपेत्॥तथा॥मंथानकंवाप्रसव्यमालोड्यित्वातां॥
दिशमभिमुखत क्षिप्त्वासंसृष्टंधनमितिमंत्रस्यमन्युस्तापसोमत्युर्जगती॥मंथा
नकन्यंचकरणेवि०॥ॐसंसृष्टंधनमुभयंसमाकृत०॥अपनिलयंतां॥अनेनम॰ रां॰
त्रेणमंथन्यंचकृत्वागच्छेदितिशिः॥जयंतमतेतु॥उल्मुकोरथस्तांदिशा १३

मभिमुखंमंथंन्यंचंकरोतीति॥एवंकृतेनकृपिभयंभवति॥यदाजुसर्वासुदिक्षु
भयंउत्पद्यतेनचज्ञायतेअस्मात्पुरुषादन्यतोवेतितदा॥अचम्यप्राणानायम्यदे
शकालौसंकीर्त्यममसर्वदिक्ष्वज्ञातसंभावितानेकभयनिरासद्वाराश्रीपरमेश्वरप्री
त्यर्थंजप्त्वाज्याकृतिहोमंजपंवाकरिष्येइतिसं०॥उपलेपादिपूर्वमग्निंप्रतिष्ठा
प्यान्वाधाय॥अस्मिन्नन्वाहितेग्नावित्याघारांतंकृत्वाप्रधाने॥अग्निं
वायुंआदित्यंचंद्रमसंवरुणंप्रणंछंदांसि॥ब्रह्माणं॥एताःप्रधानदेवताः आज्यद्रव्ये
णइध्मसन्नहनेनरुद्रमित्यादिस्मिद्दयमग्नावाधायपरिसमूहनंपरिकल्प्यपरिस्त
रणाघाघारांतेचक्षुषीवर्जं स्रुवाकृतीर्जुहुयात्॥ॐपृथिवीरतासान्नेनाहतास
यास्तयावर्ज्यायस्मांद्विषेमेमितद्वारयेस्वाहा॥अग्नयइदं०॥ॐअंतरिक्षंरतंवायुना

द्रया त

स्मा॰प्रा॰ १४ द्रया द्रया स्ता

हृतंतेनहृतेनवर्त्रेणयस्मा॰हि भेमितद्वारयेस्वा॰वायवइ॰२ॐद्यौर्हृतौंतयाहृतयाव
र्त्रायस्मा॰हि भेमितद्वारयेस्वाहा॥ॐदित्यायेदं॰३॥दिशो हृतास्ताश्चंद्रमसाहृतास्ताभिर्हृ
ताभिवर्त्रीभिर्यस्मा॰हि भेमितद्वारयेस्वाहा॥चंद्रमसइदं॰॥४॥ॐआपोहृतास्ता
वरुणेनहृतास्तीभिर्हृताभिर्वर्त्रीभिर्यस्मा॰हि भेमितद्वारयेस्वा॰वरुणायेदंनमम
॥५॥ॐप्रजाहृतास्ताःप्राणेनहृतोभिर्हृताभिर्वर्त्रीभिर्यस्मा॰प्राणायेदं॰॥६॥ॐवे
दाहृतास्तेछंदोभिर्हृतास्तैर्हृतैर्वर्त्रैर्यस्मा॰॥७॥छंदोभ्यइदं॰ॐसर्वंहृतंतद्ब्रह्मणाहृतं
तेनवर्त्रेणयस्माद्व्याहि भेमितद्वारयेस्वाहा॥९॥ब्रह्मणइदं॰॥८॥एतास्तिस्रोवाव्याहृती
र्दृष्ट्वाग्नेरात्मन्यादित्यवत्स्वायत्वस्यात्रेयंजपतियत्तदंहभयामहइतिसूक्तेनोषंत
यथा॥स्वस्तिनोमिमीतामश्विनाभगस्वस्तिदेव्यदितिरनर्वणः॥ अ॰ रा॰ १४

मिति

ष्टुभौजपेविनियोगः॥ॐस्वस्तिनोमिमीतामश्विनाभगस्वस्तिदेव्यदितिरनर्वणः॥
स्वस्तिपथाअकरोदधातुनःस्वस्तिद्यावापृथिवीकृचेतुना॥स्वस्तयेवायुमुपब्रवा
महैसोमं स्वस्तिभुवनस्ययस्पतिः॥बृहस्पतिंसर्वगणंस्वस्तयेस्वस्तयआदित्यासोभव
तुनः॥विश्वेदेवानोअद्यास्वस्तयेवैश्वानरोवसुरग्निःस्वस्तये॥देवाअवंत्वृभवःस्व
स्तयेस्वस्तिनोरुद्रःपौरुषः॥स्वस्तिमित्रावरुणास्वस्तिपथ्येरेवति॥स्वस्तिनइंद्राग्नी
अग्निश्चस्वस्तिनोअदितेकृधि॥स्वस्तिपंथामनुचरेमसूर्याचंद्रमसाविव॥पुनर्ददता
घ्नताजानतासंगमेमहि॥स्वस्त्यनंताऋक्षमरिष्टनेमिंमहद्भूतंवायसंदेवतानां॥अस्कर
घ्नमिंद्रसखंसमत्सुहवेह्यश्वोनावमिवारुहेम॥अंहोमुचेमोगिरसंगयंचस्वस्त्यात्रेयंम
नसाचताक्ष्यं॥प्रयतपाणिश्चरणंप्रपद्येस्वस्तिसंवाधेष्वभयन्नोअस्कृ॥इतिखिलाःस

मन्त्रौजपित्वा॥यतइंद्रेतिषण्णांकण्वःप्रगाथइंद्र आयात्तीयापंचम्योरुद्रत्यो
द्वितीयाचतुर्थीषष्ठसतोरुद्रत्यःजपेविनि॰॥ॐयतइंद्रभयामहे॰कधि॥मघ॰जहि
वंदिराधस्पते॰विधतः॥तंत्वावयं॰हवामहे॥इंद्रःस्वळुत॰वरेण्य॥सनोरक्षि॰त्मो
तुनःपुरः॥इतिषळृचौजपित्वा॥पूर्ववदुपविश्य॥स्विष्टकृद्जंसन्नहनहोमादि
प्रायश्चित्तहोमशेषंसमाप्य॥कर्मेश्वरार्पणंकुर्यात्॥प्रवासंगतेनकृतश्चिद्यं
भवतीतिरक्षिजयंतो॥महाध्वगमननिमित्तकर्मलिंगं॥ममममहाध्वगमनेसंभा
वितानेकडुःखलुयादिपरिहारार्थंसंपथंनध्वनइतिसूक्तेनप्रत्यृचमाज्यंहोष्या
मीतिसंकल्प्यान्वाधानादिपूर्ववत्कृत्वा॥संपथंनध्वनइतिसूक्तस्यकण्वऋषिःप
थादेवतागायत्रीछंदः॥महाध्वगमनेसंभावितानेकडुःखपरिहारायधनावाप्त्यर्थ

रां॰
१५

माज्यहोमेवि॰॥जपपक्षेतुसूक्तजपंकरिष्यइतिविशेषः॥ॐसंपथन्नध्वनःसूक्तं
यात्राकालेसदापठेत्॥अभयेनाचिरंयात्तिकार्यसिद्धिर्भवेध्रुवमिति ऋग्वि
धानोक्तेश्च॥अल्पेप्यध्वनिव्याघ्रादिभ्योभयंकरमार्गगमनेतुममसंभावितव्याघ्रादि
भयनिरासार्थमितिविशेषः॥ॐसंपथंनध्वन॰स्पुरः॥कृत्वाततः स्वाहेतिव
देत्॥पूष्णइदं॰॥१॥ॐयेनःपथन्नघोरको॰जहिस्वाहा॥२॥ॐअपत्यंपरिपंथि
नं॰रजस्वहा॥ॐस्तंतस्यदयाविनो॰॥तपुर्षि॥४॥ॐआतत्तेदस्रमंतुमः॰नचोदयः
॥५॥ॐअधानोविश्रवसोभग॰कृधि॥६॥अतिनःसश्चतोनय॰विदः॥७॥ओंअभि
सत्यवसं॰विदः॥८॥ग्नाध्यूर्धि॰विदः॥९॥ॐनपूषणंमेथामसि॰मामहेस्वाहापूष्ण
इदं॰॥ततःस्विष्टकृदादिहोमशेषंसमाप्य॥अथप्रवासोपस्थानं॥तत्रप्रवत्स्यन्तो

स्मा॰ प्रा॰ पासनाग्निंप्रज्वाल्याचम्यप्राणानायम्यममधनार्जनार्थंप्रोषितुमग्नुपस्थानं
१६ करिष्यइतिसंकल्प्याग्नेःपश्चात्तिष्ठन्नावाभयंवोभयंमेस्तुइत्युपस्थाय प्रवासं
गछेत्॥दशरात्रादूर्ध्वंअधिकप्रवासश्चेत्स्त्रवासादेत्यस्मात्वा॥अग्निंप्रज्वाल्यआ
चम्यप्राणानायम्यप्रवासादागतोहंममनस्त्वाचतुर्गृहीतमाज्यहोममग्नुपस्था
नादिकरिष्यइतिसंकल्प्याज्यंसंस्कृत्यस्रुचिचतुर्वीरमाज्यंगृहीत्वा॥मनो ज्योति
र्मंत्रेणजुहुत्वा सर्वप्रायश्चित्तंजुहुत्वा॥अभयंवोभयंमेस्तु॥इत्युपस्थायगृहीत
व दीरिस्थित्वावेक्षेत॥गृहामाविभीतोपैत्स्वस्त्येवोस्मासुचप्रजायध्वंमाचवोगोप
तीरिषत्॥इत्यनेनगृहंसंवीक्ष्यततःप्रविशेत्॥गृहानहंसुमनसःप्रपद्येवीरघ्नो रां॰
वीरवतःसुवीरान्॥इरांवहंतोघृतमुक्षमाणास्तेषहंसुमनाःसंविशानि॥ १६

रांयोः इतिगृहंप्रविश्य॥शिवंशग्मेशंयोरितिमंत्रंसकृदुच्चारन्वीक्ष्यमाणःप्र
पद्येत्॥ततःप्राङ्मुखआसीनःस्वपुरतःप्रत्यङ्मुखज्येष्ठानुपूर्व्येणपुत्राणांशिरः
उभाभ्यांपाणिभ्यांपरिगृह्यत्रिरवघ्रायततोजपेत्॥अंगादंगात्संभवसिहृदयाद
धिजायसे॥आत्मावैपुत्रनामासिसजीवशरदःशतमितिमंत्रंपश्चाज्जपंतीतिशक्ति
जयंतौ॥कुमार्याजप्यमंत्रकंत्रिराजिघ्रेत्॥दशरात्रादर्वाक्गृहागमने चम
नोज्योतिःप्रायश्चित्ताकृतिर्नभवतीतिश्रौतग्रंथेषुवक्तव्यं॥इतिप्रवासोपस्थानं
अथोपासनानुगतप्रायश्चित्तं॥आचम्यप्राणानायम्यममोपशांतमौपासनाग्निं
प्रतिष्ठापनस्वयमुपवासाभ्यांपुनरुत्पादयिष्येइतिसंकल्प्य॥पत्न्युपवासपक्षे
नुममोपशांतमौपासनाग्निंप्रतिष्ठापनपत्न्युपवासाभ्यामुत्पादयिष्येइतिसं॰॥आ

ROYAL ASIATIC SOCIETY LIBRARY OF THE BOMBAY BRANCH

श्वलायनकारिका॥औपासनानुगछेदेपलेपादिपूर्ववत्॥अहुत्यश्रोत्रिया
गारात्प्रतिष्ठाप्यहविर्भुजः॥अन्यस्माद्धोमकालास्त्रीनाप्नीयाद्यदिवागृहीतथा॥मम
नुगतमौपासनमग्नयेश्विष्टकृतेज्याहुत्वापुनरुत्पादयिष्यइतिसं०॥आयतनाद्वस्मापो
द्यश्रोत्रियागारस्थमुपलेपादिपूर्वमग्निंप्रतिष्ठाप्यपरिसमुह्यपरिस्तीर्यपर्युक्ष्यआज्यं
संस्कृत्यस्रुवंचसंमृज्यअग्निमलंकृत्यअयाश्चेत्यस्यमंत्रस्यविमदोयाळग्निःपंक्तिः
।औपासनानुगतप्रायश्चित्ता ज्यहोमेवि०॥ॐअयाश्चाग्नेस्यनभिशस्तीश्चस०नै
षजंस्वाहा॥अग्नयेअयसइदं०॥सर्वप्रायश्चित्तंकरिष्ये॥ॐभूर्भुवस्वःस्वाहा॥प्रजाप
तयइदं०॥ततःपरिस्तरणान्निर्विसृज्य॥पर्युदगोक्षणेकृत्वोचमइत्युपस्थायकाल रोम
प्राप्तंहोमंकुर्यात्॥पत्न्युपवासपक्षेतुपूर्ववत्संकल्पानंतरमग्निस्थापनादिकृत्वा १७

कालप्राप्तंहोमंकुर्यात्॥पत्नीतुतस्माद्धोमकालादारभ्यान्यहोमकालपर्यंतमुपव
सेत्॥यजमानोपवासपक्षेप्येवमेव॥यजमानेप्रोषितेपत्न्यामृतुमत्यामप्यनुगतेग्नौ
वनुगताग्निस्थापनप्रायश्चित्तादिऋंद्वाराकारयेदितिबौधायनः॥आहृदग्न्यादि
नांतमग्न्युत्पत्तिप्रकारोयं॥तदुत्तरंपुनःसंधानमेवंवृत्तिः॥इत्यनुगतप्रायश्चित्तं॥ नि
अथान्वाहिताग्नुगतप्रायश्चित्तं॥अन्वाहिताग्नेर्योगात्प्राक्अनुगतेतुपूर्ववर
ग्निमुत्पाद्यान्वाहिताग्नेःप्राग्यागानुगतनिमित्तंपुनरन्वाधानंप्रायश्चित्तंचकरिष्य
इतिसंकल्प्य॥अन्वाधान समिधमग्नावाधायभूर्भुवःस्वरित्युपस्थायसर्व
प्रायश्चित्तंकृत्वास्थालीपाकंकुर्यात्॥अन्वाधानोत्तरंप्रयाणनिमित्तकंक र्मणि
नु॥ममान्वाहिताग्नित्रयाणनिमित्तंनुभ्यंताइत्याज्याहुतिंहोष्यइतिसंकल्प्य॥संस्कृ

ताज्येनतुभ्यंतेतिमंत्रस्यअंगिराऋंषिः॥विरूपोग्निर्देवतागायत्रीछंदः अन्वाधा
नोत्तरंप्रयाणनिमित्ताज्यहोमेविनियोगः॥ॐतुभ्यंताअंगिरस्तम॰येमिरेस्वाहा॥
अग्नयइदं॰सर्वप्रायश्चित्तंचकृत्वाविधिवदग्निंसमारोप्यगच्छेत्॥अथऔपासन
होमलोपप्रायश्चित्तं॥ममऔपासनहोमलोपजनितप्रत्यवायपरिहारार्थंमनस्व
त्याचतुर्गृहीतमाज्यंहोष्यामीतिसंकल्प्य॥पर्यूहनाद्याज्यंसंस्कृत्यस्रुचिचतुर्वा
रंगृहीत्वा॥ॐमनोज्योतिर्जुषतामाज्यंविच्छिन्नंयज्ञंसमिमंदधातु॥याइष्टाउषसो
याजनिष्टास्तासंतनोमिहविषाघृतेनस्वाहामनसेज्योतिषइदं॰॥सर्वप्रायश्चित्तंच
कुर्यात्॥द्वादशदिनपर्यंतमिदमेवैकाज्याहुतिप्रायश्चित्तमितिकारिकायां॥त
दूर्ध्वमग्निनाशः पुनःसंधानहोमोवेतिप्रयोगरत्ने॥इतिहोमप्रायश्चित्तं॥अथपु

रां॰ १८

नःसंधानं॥ममयावत्कालंगृह्याग्निर्विच्छिन्नदोषजनितप्रत्यवायपरिहारार्थंजात
विच्छेददिनसंख्याकप्रायश्चित्तमुकप्रत्याम्नायेनकरिष्यइतिसंकल्प्य॥दंपतीकु
र्यातां॥ततोगृह्याग्निर्विच्छेददिनादर्वाग्यद्ययावत्लुप्तानांसायंप्रातर्होमानांतथा
चदर्शपूर्णमासस्थालीपाकानांचहवनीयद्रव्यंघृतंचनानानामगोत्रेभ्योब्राह्म
णेभ्योदातुमहमुत्सृजेत्॥दत्वाआचम्यममविच्छिन्नस्यगृह्याग्नेःपुनःसंधानंक
रिष्येइतिसं॰॥उपलेपाद्यग्निंप्रतिष्ठाप्यअस्मिन्नन्वाहितेग्नावित्याद्याघारावाज्येन
त्रिरग्निंपवमानमग्निंप्रजापतिंचाज्येनअर्यमाग्निंवरुणाग्निंषष्ठाग्निंप्रजापतिंच
लाजद्रव्येणचतुर्वारंसूर्यासावित्रीमाज्येनशेषेणेत्यादिचक्षुषीवर्ज्यं॥अग्नआ
यूंषीतितिस्रोगातवैखानसाऋषयः॥अग्निःपवमानोदेवता॥गायत्रीछंदःपु

म र

नः संधानप्रधानआज्यहोमे०॥ॐ अग्नआयंषिपवस०इषुनोस्वाहाअग्नयेपवमानाये
दं०॥ॐअग्निर्ऋषिःपवमानः०गयंस्वाहाअग्नयेप०॥ॐअग्नेपवस्व०पोषंस्वाहाअ
ग्नयेपवमानायेदं०॥त्वमर्यमावसुश्रुतोग्निस्त्रिष्टुप्॥ ॥पुनःसंधानप्रधानआज्य
होमेना ॐ त्वमर्यमाभवसि०कृणोषिस्वाहाअग्नयइदं०॥प्रजापतेर्हिरण्यगर्भःप्रजा
पतिस्त्रिष्टुप्॥पुनःसं०॥ॐप्रजापतेनत्व०रयीणांस्वाहाप्रजापतयइदं०॥ततःक्षा
लितेपत्न्यंजलौपतिराज्यस्थापत्नीयंहिर्लोजानोप्यंचावत्तीचेन्त्रिरोप्यप्रपोंजलि
स्थंश्चप्रत्यभिघार्यतिष्ठं त्वाःपत्न्यं जलिंस्वाजलौधत्वार्यमणंवरुणंपूषणं मिति
तिस्रणांवामदेवोग्निरर्यमाग्निर्वरुणाग्निःपूषाग्निरनुष्टुप्॥पुनःसंधानप्रधानला रं०
ज होमेविनियोगः॥ॐअर्यमणं०स्वाहेतिमंत्रांतेअविछिंदत्यंजलिंवामपार्श्वेनप १९

ज४

लीजुहुयात्॥अर्यमाग्नयइदं०ॐवरुणंनु०॥वरुणाग्नयइदं०।ॐपूषणंनु०प
ूषाग्नयइदंनम०ततःस्रुपेपुदेनसवोन्यतिःपत्नीवाभ्यात्मंप्रजापतिपदंध्याय
नूजुहुयात्॥प्रजापतयइदं०ततःपत्नीमुपवेश्य॥आनःप्रजामितिचतस्रणांस्रु
स्र्यासावित्री योसावि त्रीॐद्यौगतद्वितीयात्रिष्टुबंत्यैदेजनुष्टुभौ॥पुनःसंधानप्रधानाज्यहो
मेविनि०॥ॐआनःप्रजां०॥चतुष्पदे इतिहुत्वापश्चात्पत्न्यंचतस्रोपिहोतव्याः॥ स्वाहाकारं
।सूर्यासावित्र्याइदं०ॐअद्योरचक्षु०।ॐइमांत्वमिंद्र०।ॐसंमात्रीरवप्रुरे०ततःसमं
स्र्यासावित्री जंत्वित्यस्यसूर्यासावित्र्यनुष्टुप्॥दधिप्राश्नानआज्यस्रोवेणवाहृदयांजनेविनि०ॐ
समंजंतुविश्वेदेवा०।अनेनस्वयंप्राश्यपत्न्यैतूष्णीप्राशयेत्॥हृदयांजनपक्षे
नुपूर्ववत्॥ततःस्विष्टकृदादिहोमशेषंसमापयेत्॥इतिपुनःसंधानविधिः॥अ

थेष्टिप्रायश्चित्तानि॥ प्रयोगपारिजाते॥ प्रतिपद्यप्रविष्टायांयदिस्विष्टिःसमाप्यते।पुनःप्रणीकृत्नेष्टिःकर्त्तव्यायागविघ्नमैरिति॥ प्रमादादन्याग्नौचेत्स्वयंयजेतस्वाग्नावन्योवायजेतचेत्तदातुममाग्नौ स्वयंयजननिमित्तंपथिकृत्स्थालीपाकंकरिष्यइतिसंकल्प्य॥ तथा॥ ममस्वाग्नावन्ययजननिमित्तंपथिकृ०॥ पूर्णाहुतिपक्षेतुपथिकृत्स्थालीपाकस्यस्थानेपूर्णाहुतिंहोष्यामीतिसं०॥ कृत्वापुनरृतीयादितिथिष्वनाधानपूर्वकामिष्टिंकुर्यात्॥ अथातिपन्नेष्टिः॥ प्रयोगपारिजाते॥ अन्वाधानात्पूर्वंचेत्स्त्रीरजस्वलाभवतितदापंचमादिदिवसेसद्यस्कालान्वाधानपूर्वकंस्थालीपाकंकुर्यात्॥ अन्वाधानात्परतोरजस्वलाचेत्तांगृहांतरेस्थापयित्वाप्रतिपद्येवस्थालीपाकः कर्त्तव्यः॥ सूतकादिनेष्टिरतीताचेदागामितिथिषुद्वितीयांचतुर्थंनवमींचतुर्दशीं



विहायान्यासुतामतिपन्नेष्टिंप्रायश्चित्तंविनैवकुर्यात्॥ तदाह प्रयोगपारिजाते॥ स्वकालेष्टिंपकृत्वातीयादित्यत्रस्वकालन्नाद्येनागामिचतुर्दशीपर्यंतःकालोविवक्षितः॥ अनंतरेपर्वणितुप्राप्तेपथिकृत्पूर्वमतीतयागंकुर्यात्॥ ततःप्रयोगपारिजातेभगवान्॥ स्थालीपाकमतिक्रामेद्यदितद्यत्रकुत्रचित्॥ दिवसेतत्रकर्त्तव्यमेतत्तुस्मार्त्तकर्मणः॥ तत्रापियद्यतिक्रामेत्कार्यंपर्वण्यनंतरे॥ पथिकृद्धोमपर्वंतुकर्त्तव्यमवधानतः॥ चरुर्निर्वापणंतत्रपर्वंपथिकृतेग्नये॥ अन्येभ्योदेवताभ्यस्तदपरंजुहुयात्क्रमात्॥ अन्येतुपथिकृद्धोमंस्वतंत्रंकर्मामेनिरे॥ तत्तुकृत्वापुनस्तंत्रंप्रणीतादासनादिकं॥ निर्वापप्रोक्षणेकृत्वाचरुःपथिकृतेग्नये॥ अथोपरिष्टात्तंत्रंचयथाविधिसमाप्यच॥ अतिक्रांतंचकुर्वंतस्थालीपाकंयथापुरेति

ROYAL ASIATIC SOCIETY LIBRARY BOMBAY BRANCH

॥अस्यार्थः॥प्रतिपदिकर्त्तव्यस्थालीपाकस्यअतिक्रमणेअगामीचतुर्दश्यांपर्व
तासुतिथिषुयत्रकुत्रवास्थालीपाकःकर्त्तव्यः।तत्राप्यतिक्रमेनंतरेपर्वण्येव
पथिकृत्पर्वकालातिपन्नयागंकुर्यादिति॥तत्रापितिथिविशेषमाहाचार्यः स्म
तिरूपेण॥शुभेरुनितुकार्योस्यादिष्टिःपश्चात्ततःपरं॥नातीतेष्टिश्चतुर्दश्यांच
तुर्थ्यांमध्यपंचके॥नवम्यांचद्वितीयायांकार्यादृक्तयस्तथा॥मध्यपंचके॥मध्येपर्व
मध्ये॥अष्टम्यांनेत्यर्थः॥पंचके॥पंचमदिवसे॥पंचम्यांनेत्यर्थः॥यत्तुचंद्रिका
यामुक्तं॥पौर्णमास्यास्त्रयेदृव्यहोतोवाविः॥होताऋत्विक्अत्रैवकृत्वापथिकृ
तीवेश्वानरीवाअतिपन्नंकार्यं॥एतदपियावदन्यस्यपर्वणोनकालः॥ तस्मात्तुप्रा यां·
यश्चित्तमेव॥नपुनरतिपन्नानुष्ठानं॥अधिकारांतरावरोधेनकालइति॥त २१

तो

तो

देतच्छाखांतरविषयमेवेति प्रयोगपारिजातस्तु।आश्वलायनानांतुअतिपन्ने
ष्टिस्तथांतरग्रहणात्॥पर्वद्वयातिक्रमणे निर्णयमाहकौंकारः॥उभयातिक्रमे रिका
कार्यएकःपथिकृतश्चरुः॥तृतीयप्रभृतीनांतुपर्वणामतिपातने॥पुनराधेयमि
छंतिकेचिद्भ्रष्टविद्दोहिजाइतिप्रयोगपारिजातेऽप्यौनकः॥इष्टित्रयसमायोगा
त्स्मार्त्तोग्निःसंप्रणश्यति॥द्वयोर्योगेतुकार्यास्यादिष्टिःपूर्णाकृतिर्ध्रुवं
तैः॥बहूनांसमायोगात्स्मार्त्तोग्निःसं
प्रणश्यति॥श्रौतानेरुक्तद्वयोर्योगेकार्याकरणेप्रायश्चित्तंकृतिरिति॥सायणीये॥प्रजाप नि
तिः।दर्शपूर्णमासश्चेत्तौथद्वयमेववा॥एकस्यपादरुद्धेऽन्यद्वयोरर्धेनशोधनमि
ति॥अथैतत्प्रयोगः॥ममपौर्णमास्यांस्थालीपाकातिपत्तिजनितप्रत्यवायपरिहा

रार्थंयथिकृद्यागपर्वकमतिपन्नस्थालीपाकंदर्शस्थालीपाकंवाकृत्वातत्पर्वणो
न्वाधानंकुर्यात्॥ तत्राप्यतिक्रमेअतिपन्नयागस्यपादकृछ्रप्रायश्चित्तंकृत्वाक
लप्राप्तंप्रतिपदिष्टिंसद्युस्काल्यान्वाधानपूर्वकंकुर्यात्॥ तत्र ममपौर्णमासा
तिपन्नस्थालीपाकजनितप्रत्यवायपरिहारार्धंपादकृछ्रप्रायश्चित्तममुकप्रत्या
म्नायेनकरिष्यइतिसंकल्प्यकृत्वासद्युस्काल्यान्वाधानपूर्वकंप्रतिपदिष्टिंकुर्यात्
॥द्वितीयपर्वातिक्रमणेपर्ववदागामिपर्वमध्येकुर्यात्॥ तत्राप्यतिक्रमेतत्पर्वणिप
थिकृत्पर्वकंकार्यं॥ पथिकृदिष्टिस्तंत्रंप्राकृपर्वेष्यासमानतंत्रंवाकुर्यात्॥त
स्याप्यतिक्रमेतृतीयप्रतिपदिअतिपन्नहयप्रायश्चित्तंकृछ्रार्द्धंचरित्वाप्राप्तकाला रा॰
मिष्टिंकुर्यात्॥तत्रममदर्शेमासस्थालीपाकातिपत्तिजनितप्रत्यवायपरिहारार्थं २२
पूर्ण

कृछ्रार्धंप्रायश्चित्तंकरिष्यइतिसंकल्प्यकृत्वाप्राप्तकालामि ष्टिंकुर्यात्तस्याप्य
तिक्रमेआगामिपर्वपर्यंतंपर्वोक्तवदेवकुर्यात्॥तत्राप्यतिक्रमेस्मार्त्ताग्निर्नश्य
ति॥पर्वोक्तंपुनराधेयंपुनःसंधानंवाकृत्वाप्राप्तेपर्वणितदिष्टिंकुर्यात्।पुनराधेयंतु
स्थालीपाकत्रयातिपातेचतुर्थपर्वातिक्रमेवा बोध्यं।
हिरण्यकेशीयगृह्यसूत्रे॥यदिपार्वणोविच्छिद्येततस्मिन्यधिकृतेनयाज्ञ येद्यदि
ह्यौवैश्वानरपधिकृतौयदिवद्भूत्पुनराधेयमिति॥तद्यथा॥ममविच्छिन्नस्याग्
ह्याग्नेःपुनरग्न्युत्प
त्यर्थंजयंताद्यकृंपुनराधेयंकरिष्यइतिसंकल्प्याग्न्याधेयि कसंभारेषग्निंप्रतिष्ठा
प्यपर्यग्नाद्याज्यंसंस्कृत्यअयाश्चेतिस्रुवा कृतिंसर्वप्रायश्चित्तंचकृत्वापर्यग्नो

क्षणेकुर्यात्॥समारूढसमिन्नाशेसमिद्गेवाऽयमग्नुत्पत्तिः॥तत्रममसमारूढसमि
न्नाशजनितप्रत्यवायपरिहारार्थंममसमारूढसमिद्गंजनितप्र॰र्थंवापुनराधेय
करिष्यइतिसंकल्प्येतिविशेषः॥इतिकारिकायुक्तंपुनराधेयं॥अन्वाधानेष्टिमध्ये
चंद्रग्रहणंचेत्तत्रौनकोक्तप्रायश्चित्तंकुर्यात्॥तद्यथा॥इष्टिदिनेहविरासादनांते
ममअन्वाधानेष्टिमध्येचंद्रोपरागजनितवैगुण्यपरिहारार्थंअत्राहगोरित्येका
ज्याऽऽहुतिंनवोनवेत्युपस्थानंचकरिष्यइ०॥अत्राहगोरित्यस्यराहुर्गणोगौतमश्चं
द्रमागायत्री॥इष्टिमध्येचंद्रोपरागवैगुण्यनिरासार्थमाज्यहोमे॰ॐअत्राहगोरम॰
गन्नेस्वाहाचंद्रमसइदं॰ ततउत्थायनवोनवइत्यस्याःसूर्यासावित्रीचंद्रमात्रि रां॰
ष्टुप्॥चंद्रोपरागवैगुण्यनिरासार्थमुपस्थाने॰॥ॐनवोनवोभवति॰दीर्घमायुः २३

इत्युपतिष्ठेत्॥ततःइध्महवनादिप्रधानहोमः॥एवंसूर्यग्रहेतुसंकल्पादौचंद्रपर
स्थानेसूर्यपदंप्रयोक्तव्यंउदुत्यमित्यस्यकण्वःप्रस्कण्वःसूर्योनुष्टुप्॥सूर्योपरागवै
गुण्यत्यादिपूर्ववत्॥ॐउदुत्यंतमसस्परि॰कृत्तंमेस्वाहासूर्यायेदं॰। सर्वप्रायश्चित्तं।चि
त्रंदेवानामित्यस्यकुत्सःसूर्यस्त्रिष्टुप्। सूर्योपरागवैगुण्यनिरासार्थंसूर्योपस्थाने॰
ॐचित्रंदेवानां॰यन्म॥इत्युपस्थायेध्महवनादिकुर्यात्॥इतिअन्वाधानेष्टिमध्ये
ग्रहणनिर्णय॥अन्वाधानेष्टिमध्येअग्नावनुगतेतुपर्ववदयाश्चेतिमंत्रेणानुगत
प्रायश्चित्तंविधायममान्वाधानेष्टिमध्येअग्न्यनुगतवैगुण्यनिरासार्थंसर्वप्रायश्चि ग
त्तंहोष्यामीतिस॰सर्वप्रायश्चित्तंकृत्वापुनरन्वाधानपूर्वकमिष्टिंकुर्यादितिपरि
ज्ञाते॥अन्वाधानेष्टिमध्येप्रयाणेप्यस्थितौतु॥ममान्वाधानेष्टिमध्येप्रयाणवैगु

प्यग्निरासार्थंतुभ्यंताइत्यचाज्यहोमंसमारोपंचकरिष्यइतिसंकल्प्याज्यंसंस्कृत्यतु
भ्यंताइत्यस्यअंगिरसोग्निर्गायत्री।अन्वाधानेस्विष्टमध्येप्रयाणवैगुण्यनिरासार्थमा
ज्यहो मेवि०॥ॐतुभ्यंताअंगिरस्तम०येमिरेस्वाहा॥अग्नयइदं०सर्वं०अरण्यादि
ष्वग्निसमारोप्यहोमकालेअग्निंप्रत्यवरोह्यप्रातरेतोत्तरमिष्टिंकुर्यादितिप्रयोग
पारिजाते॥ ॥अन्वाधायप्रतिपदिप्रमादादिव्यक्करणेतुप्रातरौपासनोत्तरं कृता
न्वाधाने यागंकरणजन्यवैगुण्यनिरासार्थंव्यस्तसमस्तव्याहृतिभिराज्यहोमंकरि
ष्यइतिसंकल्प्याज्यंसंस्कृत्यव्यस्तसमस्तव्याहृतिभिर्हुत्वापुनरन्वाधाययागंकुर्या
दितिप्रयोगपरिजाते॥यजमानेप्रोषितेदेशांतरंपत्न्यावाऋत्विगादिनाग्निंसमारो रोम
प्यारण्यादिपत्न्यादायगच्छेदितिबौधायनः॥सर्वत्रविहितेकर्मणियजमानस्यर्त्वि २५

जांचस्वग्नेरेतोविसर्गस्यादि मंमेवरुणतत्वायामीतिद्वेस्रुवाकृतीकृत्वागंधाद्यैः
सूर्यमभ्यर्च्यपुनर्मामैत्विंद्रियमित्यचंजपेदितिबौधायनः॥तथा॥अन्वाधानोत्त
रंयजमानस्यस्वग्नेरेतोविसर्गेप्रधानयागात्पूर्वंमान्वाधानोत्तरंस्वग्नेरेतोविसर्ग
वैगुण्यनिरासार्थंइमंमेवरुणतत्त्वायामीतिद्वाभ्यामाज्याकृतिंरविपञ्जांजपंचक
रिष्यइतिसंकल्प्य॥इमंमेवरुणतत्त्वायामीतिद्वयोःवक्ष्यमाणऋच्योघृत्कास्व
ग्नेरेतोविसर्गवैगुण्यनिरासार्थमाज्यहोमेविनियोगः॥ॐइमंमेवरुणश्रु०राच
केत्स्वाहा॥वरुणायेदं॥ॐतत्त्वायामि०प्रमोयीस्वाहावरुणा०सर्वप्रायश्चित्तं॥ततो
रविपञ्जांजपंचकुर्यात्॥इतिबौधायनः॥तथा॥बुद्धिपूर्वकरेतोविसर्गेतुअग्नये
व्रतपतयेस्विष्टकृतेपाकंकुर्यात्॥ममबुद्धिपूर्वकरेतोविसर्गवैगुण्यनिरासार्थंअग्न

येव्रतपतयेस्वाहेतिस्थालीपाकंहविष्प्रजापतयेपुनर्मामैत्विंद्रियमित्यंचंजपेदितिबौधायनसूत्रेदर्शपेचोक्तं॥अथनैमित्तिकप्रायश्चित्तानि॥अर्वाक्त्रिरात्र्यापरासादग्नेरायतनाद्बहिर्गमनेतु॥अर्वाक्त्रिरात्र्यापरासादग्नेरायतनाद्बहिर्गमननिमित्तप्रायश्चित्तंकरिष्यइतिसंकल्प्य॥इदंतइत्यस्यबृहदुक्थोविश्वेदेवास्त्रिष्टुप्।अग्नावग्निक्षेपणेविनियोगः॥ॐदूरंतएकंपर०जनित्रेइतिजग्निमग्नौप्रक्षिप्यआज्यंसंस्कृत्यसर्वप्रायश्चित्ताज्याहुतिंजुहुयात्॥त्रिरात्र्यापरासीनाग्निसमीपेउपविश्ययजमानःषड्भिर्त्रिरंगुळमितःत्रिरात्र्यादायततःप्रक्षिप्तेनत्रिरात्र्यावदूरंगच्छतितावान्देशःपरिमितइतिश्रौतग्रंथेष्ववगंतव्यं॥होत्रालोकेऽप्रसिद्धावप्येवं॥त्रिरात्र्यापरासदेशाद्बहिर्गमनेतु॥त्रिरात्र्यापरासदेशाद्बहिर्गमननिमित्तप्रायश्चित्तमग्नयेपथिकृतेस्थालीपाकं

रा॰ २५

करिष्यइतिसंकल्प्य॥पूर्ववदग्नावग्निंप्रक्षिप्यअग्नयेपथिकृतेस्थालीपाकंकुर्यात्॥पूर्णाहुतिर्वाअग्नयेपथिकृतेस्वाहेत्येवंरूपा॥वर्षाणामेकदेशापहारेमनस्वतीत्युक्तंप्रायश्चित्तचंद्रिकायां॥नान्यत्॥ममौपासनाग्नेरेकदेशापहारवैगुण्यनिरासार्थंमनस्वत्येकाज्याहुतिंहोष्यामीति॥इध्माधानोत्तरंहविर्दोषेतुदुष्टहविस्थानेआज्यंप्रतिनिधिंकृत्वास्थालीपाकंसमाप्यदुष्टंहविरप्सुप्रक्षिप्यान्वाधानादियागःपुनःकर्त्तव्यःतत्रममइध्माधानोत्तरंहविर्दोषनिमित्तंतद्देवताकंस्थालीपाकंकरिष्यइतिसंकल्प्य॥तद्देवताकंस्थालीपाकंकुर्यात्॥इध्माधानात्परंहविर्दोषेतु॥ममेध्माधानात्परंहविर्दोषनिमित्तंतद्देवताकंहविःपुनरुत्पादयिष्यइतिसंकल्प्य॥तदुत्पाद्ययथापूर्वंजुहुयात्॥अंगहवि

देषितु॥ममांगहविर्दोषनिमित्तमंगहविःपुनरुत्पादयिष्य इतिसंकल्प्याज्यंपुन
रुत्पूयांगहोमंसमापयेत्॥स्विष्टकृदर्थहविर्देषितु॥ममस्विष्टकृदर्थहविर्दोषनिमि
त्तमाज्येनस्विष्टकृद्यागंकरिष्यइतिसंकल्प्याज्येनैवस्विष्टकृतंजुहुयात्॥दोषस्तू
प्रच्युतैस्तुनरैर्वैःकैः॥श्लेष्माद्यैरपिवाभक्षैर्दुष्टानिस्युर्हवींषितु॥भिन्नानिचैवसिक्ता
निदुष्टानिस्युःक्षिपेज्जले॥तथा॥स्रुक्चेद्भिद्येततर्ह्यन्यामाहृत्यजुहुयाद्हविःवान
स्त्यानिभिन्नानिप्राग्दंडान्यनलेक्षिपेत्॥इतिकारिकायांअन्यगृह्याग्निसंसर्गेतु॥
ममान्यगृह्याग्निनास्वगृह्याग्निसंसर्गदोषजनितप्रत्यवायपरिहारार्थंअग्नयेत्विविच रा
येस्थालीपाकंकरिष्यइतिसं०अग्निद्वयस्वामि नौयुगपद्देसमिधौगृहीत्वातस्मि रा०
न्संसृष्टाग्निसमारोपमारोपमंत्रेणघृताज्यअछागिरइतिमंत्रस्यवसिष्ठोग्निस्त्रिषु २६

पृ॥अन्यगृह्याग्निनास्वाग्निसंसृष्टद्विधाकरणेवि०॥ॐ अछागिरोमतयोदेवयंती
रग्निंयंतिहविणंभिसमाणाः॥सुसंदृशंसुघृतीकंस्वंचंरुंव्यवाहमद्रिंमानुषाणां॥
इतिमंत्रेणविभज्यातदेवलौकिकाग्निद्वयंप्रतिष्ठाप्यस्वस्वसमिधंघृत्यवरोद्दे
तिनिक्षिप्यअग्नयेत्विविचयेस्थालीपाकंकुर्यात्॥श्रौतग्रंथेषवगंतव्यं॥निर्व
पणेतुअग्नयेत्विविचयेत्वाजुष्टंनिर्वपामीत्याद्यग्नयेत्विविचयेस्वाहेतिजुहुयादन्य
त्समानं॥यद्वा॥अग्नयेत्विविचयेस्वाहेतिपूर्णाहुतिः॥अग्नयेत्विविचयइदं०सर्व
त्रप्रायश्चित्तस्थालीपाकेषुपूर्णाहुतिरितिबोध्यं॥गृहादेतु॥ममगृहादनिमित्त
मग्नयेक्षामायस्थालीपाकंकरिष्यइतिसं०॥अग्नयेक्षामायेतिनामदेवतायेनिर्व
पत्यागोक्तः॥पूर्णाहुतिर्वा॥श्रौताग्निनागृह्याग्निसंसर्गेतुममश्रौताग्निनागृह्याग्नि

संसर्गजनितप्रत्यवायपरिहारार्थमग्नयेश्चचयेस्विष्टकृतेस्थालीपाकंकरिष्येइतिसं॰॥अग्नयेश्चचयेनामदेवतायैनिर्वपत्यागौरुत्तःपूर्णाहुतिर्वा॥पचनाग्निनासंसर्गेतु॥ममपचनाग्निनास्वगृह्याग्निनासंसर्गनिमित्तंअग्नयेसंवर्गायस्विष्टकृतेस्थालीपाकंकरिष्ये॥अग्नयेसंवर्गायत्वाजुष्टंनि०।अग्नयेसंवर्गायस्वाहेत्यादिपर्ववत्॥पूर्णाहुतिर्वा॥ग्राम्यःपचनाग्निरिति श्रुतिः॥विद्युतेनस्वगृह्याग्निसंसर्गनिमित्तमग्नयेसम्मतेस्विष्टकृतेस्थालीपाकंकरिष्ये॥अग्नयेअक्षमतेत्वाजुष्टंनि०।अग्नयेअक्षमतेस्वाहापूर्णाहुतिर्वा॥अन्यगृह्याग्निनास्वगृह्यहेतुश्रवाग्निनापचनाग्निनावैद्युतेनच॥स्वगृह्याग्निसंसर्गेतुपंचनिमित्तेष्वपिसंकल्पोत्तरमग्निंसमिधिसमारोप्यलौकिकाग्नौप्रत्यवरोह्यतत्तन्निमित्तप्रायश्चित्तरूपस्थालीपाकंकुर्यादितिप्रायश्चित्तप्रदी

रां॰ २७

पेउक्तं॥पर्वण्यार्त्यभ्रपातेतु॥ममपर्वण्यार्त्यभ्रपातनिमित्तमग्नयेव्रतभृतेस्थालीपाकं०॥अग्नयेव्रतभृतेत्वाजुष्टं०अग्नयेव्रतभृतेस्वाहेतिपूर्णाहुतिर्वा॥अथवात्यर्वणिस्थालीपाकेनसमानतंत्रंकुर्यात्॥तद्यथा।ममपर्वणिव्रतलोपनिमित्तंअग्नयेव्रतपतयेस्थालीपाकपर्वेकंपर्वसंकल्पितदर्शस्थालीपाकेनयक्ष्यइतिसंकल्प्य॥आदौअग्नयेव्रतपतयेनिर्वपेत्ततःपूर्वप्रधानदेवतायाःहोमेप्येवं॥पवित्रनाशेतु॥॥ममपवित्रनाशनिमितमग्नयेपवित्रवतेस्थालीपाकंकुर्यात्॥अग्नयेपवित्रवतेत्वाजुष्टंनिर्व०॥अग्नयेपवित्रवतेस्वाहेति॥पूर्णाहुतिर्वा॥सर्वत्रविध्यपराधेतन्नहिध्यपराधनिमित्तंसर्वप्रायश्चित्तंकरिष्ये॥ॐभूर्भुवःस्वःस्वाहेतिसर्वप्रायश्चित्तंजुहुयात्॥अनुक्तोक्तप्रायश्चित्तोत्तरमपिसर्वत्रबोध्य

मिदं॥ स्वयमग्निप्रज्वलनेतु॥ममस्वयमग्निप्रज्वलनवैगुण्यपरिहारार्थमुद्दीप्य
स्वेतिहाभ्यांसमिधावाधास्यइतिसं०।ॐउद्दीप्यस्वजातवेदोपघ्नन्निर्ऋतिंमम॥पप्र
थ्श्चमद्यमावहजीवनंचदिशोदश॥ॐमानोहिंसीज्जातवेदोगामश्वंपुरुषंजगत्।
अबिभ्रेदग्नअगहिश्रियामापरिपातय॥इतिमंत्राभ्यांहेसमिधावग्नावाध्यात्॥जु
होतिचोदनावान्नात्रस्वाहाकारः॥स्वाहाकारंकेचिदिच्छंतितन्मतेस्वाहेतिदु
त्वाआगतयद्दंनममेतित्यजेत्॥अथाग्न्युपघातनिमित्तानित्रिकांडमंडने॥श्व सू
कर रासभ काक श्मगालैः कुक्कुट मर्कट स्पृष्टैः अंत्यजपातकिभिः कुणपैर्वा
सूतिक या रजस्वल यावा रेतोविण्मूत्रपुरीषैर्वा॥पंक्याश्रुश्लेष्म शोणितैर्दु रां·
ष्टास्थिमांसमज्जानिरन्यैर्वाति जुगुप्सितैः॥अरोपितारणिस्पर्शेकृतेग्नेस्पर्शनेपि २८

वा॥आत्मारूढेषुमज्जेहावदेहापतितादिभिः॥अथवायोषितंगछिद्रन्तौकाममो
हितः॥वरंत्वेषुनिमित्तेषुकेचिदग्निविनाग्नानं॥तत्रारणिगतेवह्नौनष्टेस्यात्पुनरा
कृतिः॥इतरेषुनिमित्तेषुअग्न्याधेयंप्रचक्षते॥यद्वासर्वोपघातेषुपुनस्त्वित्यनयास
मिदिति॥पुनस्त्वेतिमंत्रेणपुनरग्निंसमिंध्यादेवंसर्वेष्वप्यग्न्युपघातेषुइदमेत्या वे
पस्तंबसूत्रोक्तेश्च॥तद्यथा॥ममाग्न्युपघातनिमित्तंवैगुण्यनिरासार्थंपुनस्त्वेति
समिधमाधास्यइतिसं०॥ॐपुनस्त्वादित्यारुद्रावसवःसमिंधतांपुनर्ब्रह्माणोवसु
नीथय सैःघृतेनत्वंतनुवोवर्धयस्वसत्याःसंतुयजमानस्यकामाःस्वाहाइ
त्यग्नौप्रहरेत्॥जुहोतिचोदनावान्नात्रस्वाहाकारः॥स्वाहाकारंकेचिदिछंति भा
तन्मतेस्वाहेतिदुत्वाआदित्येभ्योरुद्रेभ्योवसुनीथेभ्योब्रह्मणेइदंनममेतित्यजेत्

अत्रबौधायनमतेतुपुनस्त्वेत्येतयैवस्रुवाऽऽज्यंजुहुयात् इत्युक्तं॰अकृताग्रयण नवान्नप्राशनेतु॰ममाकृताग्रयणनवान्नप्राशननिमित्तंअग्नयेवैश्वानरायस्थालीपाकंपुरोडाशंश्रपणंकृत्वातंवा॥ह्विषदन्नभोजनेतु॥ममह्विषदन्नभोजननिमित्तंअग्नयेवैश्वानरायस्थालीपाकंश्रपणंकर्मणिपुरोडाशंश्रपणमारभ्यकपालोहासनपर्यंतंकपालनाशेतु॥ममह्विःश्रपणात्पूर्वंकपालभेदनिमित्तंअग्नयेवैश्वानरायस्थालीपाकंगायत्र्यात्वेतिकपालसंधानमभिन्नइतिद्वाभ्यांअप्सुप्रक्षेपणंचकरिष्यइतिसं॰॥गायत्र्यात्वाशताक्षरयासंदधामीतिमंत्रेणभिन्नकपालसंधानद्रव्येणमट्ठिःसंधाय॥ॐअभिन्नोघर्मोजीरदानुर्यतआर्त्नस्तदगन्पुनः॥इध्मोवेदिःपरिधयश्चसर्वेयज्ञस्यायुरनुसंतरंतु॥त्रयस्त्रिंशत्तंतवोयान्वितन्वतइमंयज्ञंस्वधयायेय

राम २९

अ

जंते॥तेषांछिद्रंप्रतिदध्मोयजत्रस्वाहायज्ञोंपेतुदेवानितिद्वाभ्यामप्सुकपालंप्रक्षिपेत्॥ततःकपालांतरंप्रोक्ष्ययोजयेत्॥कपालोपधानकालेनिर्हृतांगारेपुरोडाशोपधानात्पूर्वमनुगतेसंस्कृताज्येनमनेच तंऽऽज्यंकृत्वापुनःकपालेंगारंनिधायप्रत्यृहेदितिदीपेउक्तं॥कपालस्याशुचिसंसर्गेतु॥ममकपालस्याशुचिसंसर्गनिमित्तमभिन्नइतिद्वाभ्यामप्सुप्रक्षेपंकरिष्येक्षिपेत्॥मन्मयांतरस्थाल्याद्यशुचिसंसर्गेभिन्नेवा॥ममन्मयांतरस्थाल्याद्यमुकस्याशुचिसंसर्गनिमित्तंभेदनेतुभेदनवैगुण्यनिमित्तं भूमिर्भूमि मित्यप्सुप्रक्षेपंकरिष्ये॰कुर्यात्॥ॐभूमिर्भूमिमगान्माता मातरमप्यगात्॥भूयास्मपुत्रैःपशुभिर्योनोद्वेष्टिसमिद्यतामितिमंत्रेणाशुचिसंबंधंमन्मयांतरंभिन्नंवाप्सुक्षिपेत्॥पात्रांतरंयोजयेत्॥

श्रवणाकर्मणिपुरोडाशस्फुटनेतदुत्पतनेममपुरोडाशस्फुटननिमित्तंकिमुत्पत
सीतिबर्हिषिनिधानंमाहिंसीरित्यभिमंत्रणंचकरिष्यइ०।उत्पतनेतु॥उत्पतननिमि
त्तमितिविशेषः।ॐकिमुत्प तत्तिकिमुत्तिष्ठाःशांतःशांतेरिहागहि॥अघोरोयज्ञि
योभूत्वासीदसदनंस्वंइत्युभयत्राप्यनेनैवबर्हिषिनिधायाभिमंत्रयेत॥ॐमाहिंसीर्
वपेरितआज्येनतेजसाज्येस्वमानःकिंचनरीरिषः॥योगक्षेमस्यशांत्याअस्मिन्नासी
दबर्हिषि॥इत्यभिमंत्र्यसंदध्यात॥जीवतोमृतस्यवाश्रवणेतु॥स्वस्यमृतस्यवाश्रवण
निमित्तमग्नयेसुरभिमतेस्वाहालीपाकंक०पूर्णाहुतिपक्षेपूर्णाहुतिमितिविशेषः॥अग्न
येसुरभिमतेत्वाजुष्टंनि०॥अग्नयेसुरभिमतेस्वाहेतिहोमः॥यमळजनेतु॥ममभार्यायाः
गोर्वायमळजनन निमित्तंमरुद्भ्यःस्वालीपाकंक०मरुद्भ्यस्त्वाजुष्टंनि०मरुद्भ्यः

ने२

स्वाहेतिपूर्णाहुतिर्वा॥दूयमानाहुतिस्कंदनेतु॥ममदूयमानाहुतिस्कंदननिमित्तंदेवां
जन मित्यभिमर्शनंसर्वप्रायश्चित्तंकरि०स्कंदनमादायाभिमर्शयेदनेन॥ॐदेवांज
नमगन्यज्ञस्यमाशीरवतुवर्धतां॥भूतिर्घृतेनमुंचतुयज्ञोयज्ञपतिंमहः॥भूय
ये तेंस्वाहा भुवनपतयेस्वाहा भूतानांपतयेस्वाहा यज्ञस्यत्वाप्रयाजैर्याभिमया
प्रतिमयाऽप्सश्चस्कंद॥इत्येतदंतमंत्रेणताहुतिमभिमृश्यतूष्णीमग्नौप्रक्षि
प्य॥सर्वप्रायश्चित्तंजुहुयादितिनारायणवृत्तिः।अनाहुतिरूपहविःस्कंदनेतु।म
न मानाहुतिरूपहविस्कंदनवैगुण्यनिमित्तंदेवांजेमित्यभिमर्शनंसर्वप्रायश्चित्तंक०
देवांजनेतिपूर्ववदभिमर्शनंकृत्वासर्वप्रायश्चित्तंजुहुयात्॥अवशिष्टेनप्रचरेत्
।शेषाभावेपुनर्मंत्रवन्निर्वापादिकुर्यात्॥सर्वप्रायश्चित्तंचेतिकारिकायां।निमि

नानंतरंसर्वप्रायश्चित्तंभवेदिद्॥आज्यसंस्कारात् प्रागेवयदादोषउत्पद्यतेतदा
आज्यसंस्कारानंतरंप्रायश्चित्तंकुर्यात्॥सर्वत्राकृतिमात्रद्विधांस्कंदनेप्रायश्चि
त्त मिष्यते॥आकृतिप्रमाणं स्रुवबिळपूर्णपर्यंतं॥स्रुवबिळंच अंगुष्ठपर्वप्रवे
शानपर्यंतं॥कर्णिद्व्याणांत्वंगुष्ठपर्वमात्रस्कंदनेप्रायश्चित्तमितिदीपेउक्तं॥देश
विशेषेस्कंदनदोषाभावः॥भस्म न्यग्नौद्विधानेवेद्यांस्तीर्णेबर्हिषिकूर्चेविप्रस्य च
पाणौचस्कंन्नदोषानविद्यतइतिदीपोक्तेः॥अग्नौस्कंन्नदोषापवादःसपोक्त सम
येतरविषयःतत्रतापाद्वत्सेकनिस्रावादौप्रायश्चित्तामनांत॥कूर्चोअग्निहोत्रेप्रसि
द्धः॥देवताव्युत्क्रमेतु॥ममदेवताव्युत्क्रमनिमित्तंयद्देवाइत्याज्याकृतिंब्रह्मणे रांम॰
न्यस्मैवामुख्यहोमद्रव्यदानंकरिष्ये॰संस्कृताज्येनयद्देवाइत्यस्याभितपामरु ३९

ना२

अ

तस्त्रिष्टुप्॥अमुकदेवताव्युत्क्रमनिमित्तमाज्यहोमे॰॥ॐयद्देवादेवहेळनं॥अरायोअस्मांअभिदुछुनायतेन्यत्रा.स्मन्मरुतस्तन्निधेत
नस्वाहेतिब्रह्मास्वयंवासुवाकृतिंजुहुयात्॥मरुद्भ्यइदं॰॥सर्वप्रायश्चित्तंचाय
जमानःस्वगृहेमुख्यद्रव्यतत् ब्रह्मणेन्यस्मैवादक्षिणात्वेनदद्यात्॥इदमेवप्राय
श्चित्तंद्रव्यव्युत्क्रमेदेवव्युत्क्रमेअवदानव्युत्क्रमेनिर्वापव्युत्क्रमेयागव्युत्क्रमेइत्या
दितत्तद्व्युत्क्रमेज्ञेयं॥तंत्रमंत्रव्युत्क्रमनिमित्तद्रव्यव्युत्क्रमनिमित्तंअवदानव्युत्क्रम
निमित्तंनिर्वापाद्युत्क्रमनिमित्तमित्यादिनिमित्तेषुयद्देवाइत्याज्यहोमप्रायश्चित्त ६
संकल्पंकुर्यात्॥सर्वत्रैवप्रायश्चित्तरूपजपंहोमंवाब्रह्मैवकुर्यात्॥जुहोतिजप
तीतिप्रायश्चित्तेब्रह्माणमित्याश्वलायनश्रौतसूत्रोक्तेः॥तदभावेतुयजमानःस

मानन्यायत्वात्॥यत्रस्वकालेकर्माकरणनिमित्तप्रायश्चित्तमुक्तंतस्मिन्प्राय
श्चित्तेकृतेतीतंकर्मकार्यंनवेतिमतभेदःतदुक्तंकारिकायां॥प्रायश्चित्तेकृते
पश्चादतीतमपिकर्मवै॥कार्यमित्येकआचार्यानेत्यन्येतुविपश्चितइति॥या
गात्प्राक्चयुत्क्रमेसतियद्दोदेवाइत्यासुक्रुप्रायश्चित्तंकृत्वायागंकुर्यात्॥प्राग्याग
द्युत्क्रमेज्ञातेइदंकृत्वायजेतेतिकारिकायां॥दृविष्प्रकृतेतुअपक्रमेनेवदृवि
र्यागंसमाप्यमम्यागसाधनीभूतदृविरपकृतानिमित्तंचतुःशरावपरिमित
व्रीहिनिष्पादितोदनंनचतुरोब्राह्मणान्भोजयिष्येइतिसंकल्प्योक्तमोदनंकृत्वा
चतुरोब्रह्मणान्भोजयेत्॥एकद्विभोजनपर्याप्तमन्नंशरावमिति कारिकायां॥दृ रो॰
विर्दृहेतुयशरावदोनपर्याप्तमदग्धंलभ्यतेतदातेनैवयागःकर्त्तव्यःनवैश्रोष्प्राय ३२

न

श्चित्ते॥यदात्ववदानपर्याप्तमदग्धंलभतेतदातावन्मात्रेणैवयागंकृत्वातंत्रश्रोषंस
माप्य॥ममदृविर्दृनिमित्तंपुनर्यागंकरिष्यइतिसंकल्प्यअन्वाधानादिपुनर्या
गंकुर्यादितिकारिकायां॥ममानवद्यिष्टयागपर्याप्तदृविर्दृहेतुपुनर्दृविरंतरान्ने
त्पत्तिंकृत्वान्वारब्धएवयागःकार्यः॥चरौस्रुप्यमाणेप्राग्द्रिक्षितापादुत्सिक्तेअ
ग्नयेस्वाहेतिस्रुवाहुतिः॥यदिदक्षिणतउत्सिक्तेयमायस्वाहेति॥यदिपश्चिमतउ
त्सिक्तेवरुणायस्वाहेति॥यदुत्तरतउत्सिक्तेसोमायस्वाहेति॥यदियुगपत्सर्वउत्सि
क्तेसर्वाहुतीर्जुहुयात्॥विदिक्षूत्सिक्तेव्याहृतीर्जुहुयादितिउत्सिक्तंचरुमाज्येना
प्याययतिति॥ॐआप्यायस्वसमेतुते॰संगथे॥संतेपयांसिसमुयंतु॰धिष्व॥आभ्यां
जुहुयादितिबोधायनः॥तत्स्रुयोगः॥स्रुप्यमाणचरोःपर्वादिक्षुसर्वतोवातापा

दि

दुत्सिक्तजनितप्रत्यवायपरिहारार्थमाज्याहुतिंहोष्यदितिसंकल्प्याप्रधानहोमा
त्पूर्वंप्रायश्चित्तंजुहुयात्॥पाकात्पूर्वंहविषांकेशाद्युपहतौप्रक्षालनेनप्रोक्षणे
नवाश्रुद्धिरित्यादेव्यं॥अवदानंदुष्टंचेत्तत्तएवपुनरवदायजुहुयात्॥उक्तंच
कारिकायां॥मध्यात्पूर्वार्धतोवत्तंयदिदुष्टंहविर्भवेत्॥तस्यैवहविषोद्यन्मध्या
त्पूर्वार्धतःपुनरिति॥स्थालीभेदेनेतुविक्षिप्तमौपासनद्रव्यंपयोन्यद्वानेदेनविक्षि
प्तजनितप्रत्यवायपरिहारार्थंतदभिमर्शनंजलप्रक्षेपणंचकरिष्यदितिसं०॥ततदु
ष्टमभिमर्शयेदनेनमंत्रेण।ॐसमुद्रंवःप्रहिणोमिस्वांयोनिमपिगच्छत॥अरिष्टा
अस्माकंवीरामयिगावःसंतुगोपतौ।इतिजप्त्वातदस्त्रुवक्षिपेदितिसूत्रेउक्तं॥पात्र
नेदंविनायसःस्कंदनेनैतत्प्रायश्चित्तं॥प्रायश्चित्तांतरस्यवक्ष्यमाणत्वात्॥द्रव्यं

तरस्कंदनेतु भवति॥अधिश्रितमौपासनद्रव्यंस्थालीमूलेनयदिस्रवतितदा॥
ममाधिश्रितमौपासनद्रव्यंपयोन्यद्वास्थालीमूलेनस्रवज्जनितप्रत्यवायपरिहा
रार्थंतदभिमंत्रणंकरिष्ये०अभिमंत्रयेत्॥ॐगर्भंस्रवंतमगदमकर्माग्निर्होताएथि
व्यंतरिक्षंयतश्चुतद्रप्नावेवतन्नाभिप्राप्नोतिनिर्ऋतिंपुरस्तात्॥औपासनहो
मार्थंऔपासनस्थाल्यांपयःप्रक्षेपादारभ्यअधिश्रितपयसिस्कन्नेस्कंदनमभिम
न्त्रणंतमाधिश्रितमनधिश्रितंवापयस्कन्नजनितदोषनिर्हरणार्थंतदभिमर्शनंकरिष्य
इतिसंकल्प्याभिमर्शयेत्॥ॐयदद्यदुग्धंपृथिवीमस्रत्तयदोषधीरत्यस्पद्यदापःप
योगृहेषुपयोअघ्यायांपयोवत्सेषुपयोअस्तुतन्मयीतिजपेत्॥द्रव्यांतरेअधिश्रिते
स्कन्नेअधिश्रितेवापयसिवाविष्यंदनेनाग्निमंत्रमिवांतंतत्तदादायब्राह्मणोक्तंप्रा

ROYAL ASIATIC SOCIETY LIBRARY OF THE BOMBAY BRANCH

यश्चित्तंकुर्यात्॥तत्रपाकार्थमधिश्रितंसत्ययःकदाचित्स्कंदेत्स्खलति क्षारबिंदुरधः
पतति विष्यंदितंवाद्रव्यमद्भिरुपनयेत्॥जलेनसिंचेन्नछोत्यर्थंभवति॥अपांशीतलत्वे
यत्वेनशांतत्वात्॥अथजलसेचनानंतरंतुममपाकार्थमधिश्रितपयस्थालीमुखोप
र्युऊर्ध्वनाग्नोविष्यंदनवैगुण्यनिरासार्थंतदभिमंत्रणंकरिष्यइतिसंक०॥तद्दक्षिणे
नपाणिनाभिमृश्यजपति॥दिवंतीर्यंदेवान्यद्गोगात्तोमाद्विणमाष्टांतरिक्षंत
तीर्यंपित्र्यद्गोगात्तोमाद्विणमाष्टेथिवींतीर्यंमनुष्यान्यद्गोगात्तोमाद्विण
माष्॥अंयद्योरोजसास्कभितारजांसिवीर्यभिवेरतमान्नाविष्ठयापत्यतेघृतीता
सहोभिर्विसूअगन्वरुणापर्वकृतो इतिउद्गासितेविष्यंदितेपयसिमहीद्यौः
पृथिवीचनेत्यृचातत्पयऔपासनस्थभस्मांतेनिनयेत्ममोद्गासितूयसंविष्यंद

रां॰ ३४

अ३

नवैगुण्यनिरासार्थंतद्भस्मांतक्षेपणंकरिष्यइतिसं॰आदाय॥महीद्यौरितिमंत्रस्य
मेधातिथिर्ऋषिः॥पृथिवी देवता॥गायत्रीछंदः॥भूमौरुविष्यंदितपयसौपासन
स्थभस्मांतेनिनयनेविनियोगः॥ॐमहीद्यौःपृथि॰भरीमभिरितिआधिश्रितमौपा
सनद्रव्यंयदिशक्येत्तरातद्रव्यंसमोषधीष्वानमित्यनेनमंत्रेणाभिमंत्रयेत्॥इत्या
श्वलायनश्रौतसूत्रेउक्तं॥तत्रममाधिश्रितौपासनद्रव्याच्छकृन्निर्गमनवैगुण्य
परिहारार्थमभिमंत्रणं॥औपासनद्रव्यं शरीरात्प्रच्युतकेशनखामेध्यव सा
कीटपतंगश्लेष्मादिसंसर्गदुष्टंप्रजापतेनत्वदेतान्यन्यइत्यंतेस्वाहेतिमंत्रेण
मध्यमेनपलाशपर्णेनसदर्भकेनवल्मीकेजुहुयात्॥प्रधानाकृतिद्रव्यार्थस्यौपा
सनद्रव्यस्याभिवर्षलेमित्रोजनेनि त्यृचासमिधांतरमौपासनेआधेयं॥उत्तराङ्ग

त्यर्थस्यस्कंदनेयत्रवेत्थवनस्यतैत्येतय-र्चासमिधांतरमौपासनेआधेयं॥अ
त्रसर्वत्रतत्तत्प्रायश्चित्तांतेसर्वप्रायश्चित्तंजुहुयाज्जपेद्वा॥सर्वत्रहविर्देवताया ज्या
नुवाक्यानांहुताहुतन्नेषेष्वंतरितेविपर्यासेचत्वन्नोअग्नेवरुणस्यऽइत्येताभ्यां
स्रुवाहुतीर्जुहुयात्॥अस्यबौधायनस्त्रेविस्मरः॥हुतशेषोनाशोअनग्नौपत
नेहुतयाभ्नेषोनाशोवतस्यनाशः॥तत्रत्वन्नःसत्वन्नऽइत्याहुतीर्हुत्वापुनःस्वस्ण
नारवरायययजेत्॥एकावदानाद्यकरणेयागेपर्वजातेसतित्वन्नःसत्वन्नऽइत्याहु
तीर्हुत्वापुनर्विस्मृतावदानमादाययजेत्॥एकावदानादिनायागेकृतेत्वन्नःसत्व
न्नऽइत्याहुतीरेव॥पुनर्यागःहविषामंतरायःएकावदानाद्यकरणंबहुहविष्यक
र्मणिएकस्यहविषोकरणंवाहविषांविपर्यासोव्यत्यासः॥देवताज्यानुवाक्या

नामेकस्यापिविस्मरणमंतरायः॥आहुतीन्नेषस्त्वाहुतेर्नाशः॥यथाविज्ञातदेवता
हुतिर्नश्यतीति॥अयमाहुतेर्हुतन्नेषः॥आहुतेरहुतन्नेषस्तुयावत्स्वयोगसम
प्तिस्तावदाहुतेरकरणं॥तत्रसर्वत्रत्वन्नोअग्नेव०सत्वन्नोअग्नेवमो०इतिहेस्रुवा
हुतीर्जुहुयात्॥हविर्देवताधर्माणांयाज्यानुवाक्यानांपार्वणांगहोमानांचव्यत्या
सेहेस्रुवाहुतीर्जुहुयात्॥हविर्देवताधर्माणांयाज्यानुवाक्यानांपार्वणांगहोमानां
मित्यत्रस्मार्तेअयाश्चेत्यादयआज्यभागादयोवायाज्यानुवाक्ययोःपरस्परव्यत्या
सेतद्देवत्यान्ययाज्ययागेकृतेपित्वन्नःसत्वन्नऽइत्याहुतीरेवनपुनर्यागः॥अंतरितांश्चै
जपेत्॥भिन्नदेवत्ययाज्ययागेकृतेत्वन्नःसत्वन्नऽइत्याहुतीर्हुत्वापुनर्यागंकुर्यादिति
रीपेउक्तंतत्राघस्तंबसूत्रमपि॥ॐत्वन्नोअग्नेतवदेवपायुभि०वंद्य॥त्रातातोक०।

स्रुवव्रते॥तथा॥सत्वन्नोअग्नेवमोभवोती॰ नेदिष्ठे॥अवयक्ष्वनो॰ नराधि॥इत्युच्चा
र्यसर्वत्रांतरायेविपर्यासेचजुहुयादितिदीपेपि॥सर्वत्र हविषिस्थितेभागेनष्टेस्था
नादवदायपुनर्यागः कार्यः॥हविष्यविद्यमानेहविरंतरं निरूप्ययागः कार्यः॥प्र
क्षांतमाज्येनस माप्यपुनर्यागोवाकार्यः॥सर्वत्रादानेआकृतेहविषिदोषदर्शनेवतं
हविस्फ्यगतभस्मनिवाप्रक्षिप्यत्वन्नः सत्वन्नइत्याकृतीकृत्वापुनरवदायय जेत्॥अ
वदानानंतरंपुरोडाशादौदोषदर्शनेचतेनहवि॑प्रधानयागंकृत्वाडुडुंभस्मनिक्षिप्य
त्वन्नः सत्वन्नइतिद्वेस्रुवाकृतीकृत्वाघौवाज्यास्विष्टकृतादिकुर्यात्॥पुनर्यागःश्रोते
घौवाज्यंतस्मात्तैआज्यस्थालीतः॥अवदानकालेपुरोडाशादौकेशादिदोषदर्शनेदु
ष्टंहविरप्यक्षिप्यपूर्वादानादिहविरंतरंनिरूप्यत्वन्नः सत्वन्नः इतिकृत्वातेनयागंकु

षा

रं॰

३६

र्यात्आज्यभागांतंयजेत्ज्ञानाभकरणेतुत्वन्नः सत्वन्नइतिस्रुवेणाज्याकृती
जुहुयात्॥इतिदीपेउक्तं॥सर्वत्रद्रव्यमंत्रकर्मव्यभिचारज्ञातप्रायश्चित्तेषुनाज्ञातांत्य
दशांतंपुरुषसंमितमितिद्वेस्रुवाकृतीजुहुयात्॥दोषदुष्टेनस्फ्येनवाहविषाअना
ज्ञानात्प्रधानयागेतुप्रणवव्याहृतीर्जुहुयात्॥अथहविर्दोषान्बौधायनसूत्रे॥अथ
हविर्दोषान्व्याख्यास्यामोयैर्हविर्दुष्यतितान्वक्ष्यामः॥अखुदेहवार्त्तानीलमक्षिका
गवांमंगवर्त्तिन्याशांतिकालतक्रवतीमकुणः॥चैलशिरोवर्त्तिनीयकामळर्पिड
कारीकोटः॥श्वामार्जारनकुलमर्कटाःप्रसिद्धाः॥ध्वांक्षःकाकःआखुर्मूषकःतेषाम
न्येषांचपुरीषंमलः॥केशाःप्रसिद्धाःसिकताःपरिहितवसनोचलपदपादःमृतनखछि
न्ननखाःकुनखोदुष्टनखःपुरुषःपूतिदुर्गंधावहाःदूषःमुखजाविप्रुषःस्वेदःप्र

स्मा॰ प्रा॰ सिद्धः॥ असृक् रुधिरं॥ स्नेहो नासिकं पूयः॥ अश्रु नयनांबु कासः॥ श्लेष्मा क्षवथुः
अ॰ ३७ सुतं॥ आर्द्रव्रणं चेति॥ एतैरुपहतं॥ वसाश्रुक्रमसृक् मज्जा मूत्रविट्कर्णविट्खवाः न
श्लेष्माक्षिपूतिकास्वेदो द्वादशैतेऽन्नमलइति॥ एतैश्चोपहतं॥ रजस्वलास्त्रिकोभ्यांस्पृष्टंदुष्टं चयद्विः॥ उन्मत्तेनाशुचिनादृष्टं स्पृष्टं चाव्रणहेतवः॥ भ्रूणाःपंचत्रिंशत्यज्ञागर्भिणीब्राह्मणेनपरइति॥ एतेषामन्यतमोहंतिसभ्रूणघ्नःतेनदृष्टंस्पृष्टंच॥ अपात्रेणग्रामंचंडालादिनादृष्टं स्पृष्टंच

॥ध्वजोचरज
रि कोलोहारश्चैवैश्रवणाधिपः॥ तक्षकोवागुरितिग्रामचंडालकास्मताइति॥ अमेध्य रो॰
देशोवास्कंदनंयत्रप्रस्रूयतेनारम्रियतेदह्यतेपिवा॥ चंडालाध्युषितेयत्रयत्रवि अ॰ ३७

ष्ठादिसंगतिः॥ एवंकल्पमृषिष्टाभ्रमेध्याप्रकीर्त्तिता॥ एवंभूतामेध्यदेशे
स्कन्नंचएवंदुष्टंविरस्तुशीतमस्मिनिवाप्रक्षिप्यमिंदाऊतीव्याहृतयोवाऊत्वापुनर्नि
र र्वापादिहविरंतंमुत्याद्ययजेत्॥ अशक्तौक्षिप्रं कर्त्तव्यतायाम्तोआज्येनवायजेत्॥ आ
ज्यपक्षेमनस्वतीचप्रायश्चित्तं॥ क्षुद्रकीटकमक्षिकापिपीलिकानांहविषिपतने
तु॥ क्षुद्रकीटोघ्राणादिः॥ मक्षिकापिपीलिकेप्रसिद्धे॥ एषुप्रमादाद्धविषिपतितेषुन
दोषः॥ सर्वत्रक्षुद्रकीटमक्षिकापिपीलिकादीनांअपंअनष्टंचममुद्धृत्याभ्युक्ष्योत्पू
यजुर्ऊयात्॥ ऊर्ध्वंचेद्दृष्टमेवेतिजैमिनिः॥ डुष्टेनहविषायागेकृतेपश्चाद्दोषज्ञानेपुन
र्योगोनकार्यइतिकात्यायनः॥ आज्योपहतौतज्जलेप्रक्षिप्यान्यत्संस्कृत्यतेनयागंकुर्या
दित्यपरेव्यं॥ ऊतेहविष्यनग्नौपतितेत्वन्नःसत्वन्नइत्याभ्यांस्तुवाऊतीऊत्वापुनर्

वदायय जेदित्युक्तमापदेव्यं॥प्राडुष्करणाद्ध्वंदोमात्पूर्वंयद्यजमानोऽग्नार्यदूक्षये
द्वातर्हावयंपुरुषयथादत्तादित्याज्याहुतीजुहुयात्समिधौवाआदध्याज्येहुत्युक्तमाप
स्तंबसूत्रे॥तद्यथा॥मम प्राडुष्करणाद्ध्वंदोमात्पूर्वंभोजनवैगुण्यजनितप्रत्यवा
यपरिहारार्थंदैवंयथादत्तादित्याभ्यामाज्याहुतीहोष्ये॥समित्प्रक्षेपणपक्षेअभ्या
मेवसमिधावाधास्येजपंपक्षेआभ्यांजपंकरिष्ये।संस्कृताज्यमादाय॥ॐयत्तेव
यंपुरुषत्रायविस्रंसविद्वांसश्चकृमाकंतनागः॥कृधीष्मान्अदितेरनागान्येना
सिश्रिश्रयोविश्वगग्नेस्वाहा॥अग्नयेस्विष्टकृतइदं॥ओंयथादत्तहसवोगौर्यचि
त्पदिंताममुंचतायजत्राः॥एवोत्वमस्मन्मुंचाव्यंहःप्रतार्यग्नेप्रतरन्नआयुःस्वाहा॥ सं॰
त्यागौपूर्ववत्॥दीयेप्येवं॥लुप्तप्राडुष्करणेतुसर्वंप्रायश्चित्तमेव॥प्राडुष्करणाद्ध्वं ३८

मुं

ध्वंदोमात्स्वाग्यजमानोनभुंजीयादित्युक्तंकात्यायनसूत्रे॥येनकेनचिन्निमित्तेन
सायंप्रातर्होमौनलब्धौचेत्तदारात्रावुद्रिचनभौक्तव्यमित्येवनान्यत्प्रायश्चित्तमिति
त्रिकांडमंडने॥अथपंचमदायज्ञलोपेतु॥ममदेवयज्ञलोपनिमित्तंमनस्वत्याच
तुर्गृहीतंहोष्यामीतिसंकल्प्य॥संस्कृताज्यंदर्व्यांचतुर्गृहीत्वा॥ॐमनोज्योतिर्जुषता
घृतेनस्वाहामनोज्योतिषइदं॥इतिकारिकायां॥यद्वावैश्वदेवाकरणेचसर्वैश्चानर
कर्त्तव्यइतिमाधवः॥अग्नयेवैश्वानरायेतिमंत्रोनिर्वापेज्ञेयः॥यद्यहंव्यहंवालोपेतु
ममयद्यहंव्यहंवादेवय ज्ञादिपंचमदायज्ञलोपनिमित्तंतिस्रभि स्तंतुमंतीभिराज्य
होमं चतसृणांवारुणीनांजपंचकरिष्येइतिसंकल्प्य॥आज्यंसंस्कृत्यतंतुं
तन्वन्नित्यस्यदेवोग्निर्जगती॥पंचमदायज्ञेषुअमुकयज्ञलोपप्रायश्चित्तआज्यहोम
वाम

स्मा॰ प्रा॰ ३९ त

वि॰॥ॐतंतुंतन्वन्नजसे॰ कृतमा॒अनु॒रभ्रणं॰। दैव्यंनंस्वाहाअग्नयेतंतुमतइ
दं॰। ॐउद्बुध्यस्वाग्नेप्रतिजागह्येनमिष्टापूर्त्तेमꣳसृजेथामयंच॥ पुनः॒कृण्वꣳस्वा
पितरंयुवानमन्वाताꣳसौयितंतुमतꣳस्वाहाअग्नयेतंतुमतइदंनमम॥ॐत्रयस्त्रि
ꣳशत्तंतवोयेवितत्निरेयइमंयज्ञꣳस्वधयायेयजंते। तेषांछिन्नंप्रत्येतद्धामिस्वाहा
घर्मोदेवोंअप्येतुस्वहेतिसुवाऊतीर्ऊत्वा॥अग्नयेतंतुमतइदं॰॥सर्वप्रायाश्चित्तं
च॥अवतेहेळउदुत्तमंमिममेवरुणपाशंत्वायामीति चतसृणांआजिगर्त्तिःशु
नःशेपःमरुत्त्रिमोवेश्वामित्रदेवरातोवरुणस्त्रिष्टुप्॥ततोयागायत्रीजपेवि॰
ॐअवतेहेळोवरुणनमोभि॰ हविर्भिः॥क्षयंनसम्रा॰ कृतानि॥ॐउदुत्तमंवरु रांम॰
ण॰ प्रथाय॰ अथावय॰ स्याम॥२॥ॐइमंमेवरुणश्रु॰ मरुधा॰ त्वामवस्युराचके॥ ३९

ॐतत्वायामिब्रह्मणावंद॰ हविर्भिः॥अहेळमानोवरु॰ प्रमोषारितिजपेदितिकारि
कायां॥ममपंचमहायज्ञनामेकस्यवाद्यादंहादयादंवालोपेचतसृभिर्वारुणीभि
क राज्यहोमंतंतुमतस्रुवालोपाकंचरिष्यइतिसं॥अन्वाधानेआज्यभागोत्तंवरुणं रं
चतुर्धरमाज्यनअग्निंतंतुमंतंचरुणाशेषेणाग्निंस्विष्टकृमित्यादिनिर्वपकालेप त
वित्रवतिस्रुवेअग्नयेतंतुमतेत्वाजुष्टंनिर्वपामीतिचतुर्धारंनिरूप्यप्रोक्षणास्रव
ता घोदिचरुंश्रपयित्वाआज्यभागांते॥अवतेहेळउदुत्तमंमिममेवरुणपाशंत्वायामिच
तसृणांपूर्ववदाघुत्कामम पंचमहायज्ञेलोपप्रायश्चित्तार्थमाज्यहोमेवि॰॥
ॐअवतेहेळो॰ कृतानिस्वाहावरुणायेदं॰। ॐउदुत्तमं॰॥स्यामस्वाहावरुणाये
दं॰॥ॐइमंमेवरुण॰ राचकेस्वाहावरुणायेदं॰॥ॐतत्वायामि॰ धीस्वाहावरुणा

येदं॰॥
चतस्रआहुतीर्हुत्वा स्रुच्यवदानधर्मेणचरुमवदायअग्नयेतंतुमतेस्वा
हेतिचरुंहुत्वास्विष्टकृदादिहोमत्रोषंसमापयेदितिकारिकायां॥उपवासपक्षेतु
ममतत्तन्महायज्ञलोपनिमित्तमुपवासंकरिष्यइतिसं॰उपवसेत्॥सर्वत्रकर्म
कालेअग्नियजमानयोर्मध्येनकेनापिनगंतव्यं॥होमकालेतथादोहेस्वाध्यायेदा
रसंग्रहे॥अंतरेणयदागछेद्विजश्चेदयणंचरेत्॥इतिप्रयोगपारिजातेप्रायश्चि
त्तस्योक्तेः॥दोहेश्रोतेस्वाध्यायेगुरुशिष्ययोर्मध्येशोषंचसिद्ध्यं॥स्नातकव्रतलोपेतु
ममस्नातकव्रतलोपनिमित्तमुपवासंकरिष्यइतिसंकल्प्योपवसेत्॥इत्यादिकारि
कोक्तप्रायश्चित्तानि॥आग्रयणादिपाकयज्ञानांमध्येन्यतमस्याकरणेप्रायश्चित्त

रां॰ ४०

माह॥पारिजातेप्रजापतिं॥हविर्यज्ञेषुनाक्तस्यलुप्तमध्येकआदितः॥लुप्तमाग्र
यणादिकमितिपाठः॥प्राजापत्येनशुद्धिःस्यात्पाकसंस्थासुचैवहीति॥एतेनुरू
प्रायश्चित्तानांश्रवणाकर्मसर्पबल्याश्वयुजीकर्माग्रयणव्रत्यवरोहणप्रायश्चित्त
मित्यवगंतव्यं॥तत्रममामुकपाकेष्टाकरणव्रत्यवायपरिहारार्थंप्राजापत्यप्राय
श्चित्तममुकव्रत्याम्नायेनकरिष्यइतिसंकल्प्य॥प्राजापत्यंकुर्यात्॥श्रवणाक
र्मादिपाकसंस्थाःपत्न्यामृत्विग्भ्यामपिकुर्यादेव॥श्रौतप्रायश्चित्तकारिकायांगोपा
लः॥प्रक्रांतमग्निहोत्रियंश्रौतंकर्मचोदितंआर्त्तवाभिप्लुतांभार्यांविहाकुरुतेद्विज
ति॥तथाचौपासनपाकयज्ञनिरूढादानातिथिदेवतार्चनादिकमपिपत्न्यामृत्विग्
भ्यांकर्त्तव्यमेवेतिप्रायश्चित्तचंद्रिकायामुक्तं॥गौणकालाभावात्॥अनन्यगतिकं

रा॰ ४०

स्मा·घा
४१

नित्यंकुर्यादेवेतिमाधवोक्तेश्च॥अपूर्वारंभस्तूनभवत्येव॥अथपिंडपितृयज्ञे॥अति
क्रमणेतनाशेसर्वप्रायश्चित्तमेवकुर्यात्॥पुनरतिक्रमणायनं॥कार्याभावात्॥तस्मि
न्नौमपक्षेपिंडपक्षेचप्रायश्चित्तंकृत्वा पुनर्मंत्रेणतिक्रमणायनंकर्त्तव्यमितिश्रौतयं
त्रेष्ववगंतव्यं॥अथपिंडपितृयज्ञाकरणेप्रायश्चित्तं॥अमावास्यायांपिंडपितृयज्ञा
करणेप्रायश्चित्तत्वेनवैश्वानरचरुर्भवति॥नपुनःपिंडपितृयज्ञः॥तस्यगौणका
लाभावात्॥तथाचपाराशरमाधवीयेकात्यायनः॥ पिंडपितृयज्ञात्ययेचैववैश्व
देवात्ययेतथा॥भोजनेपतितान्नस्यचरुर्वैश्वानरोभवेदिति॥तद्यथा॥ममपिंडपि
तृयज्ञाकरणप्रत्यवायपरिहारार्थमग्नयेवैश्वानरायस्थालीपाकंकरिष्यइत्याद्य रां·
ग्नयेवैश्वानरायत्वाजुष्टंनिर्वपामीत्यग्नयेवैश्वानरायस्वाहेतिविशेषः॥ततःस्विष्ट ४१

कृदादिसमापेत्॥अथवाप्रकृतस्थालीपाकतंत्रंचक्षुष्यंतंकृत्वापिंडपितृयज्ञले
पेबौधायनापस्तंबमतात्संग्रहंसंग्रहोतारंसंग्रहीष्यामीतिसंकल्प्य॥दर्व्यांच
तुर्वारमाज्यंगृहीत्वा॥ॐमहादग्निर्होता॥सत्यहोतरध्वर्युः॥अच्युतपाजाअग्नीत्
॥अच्युतमनाउपक्रा॥अनाधृष्यश्चा प्रतिधृष्यश्च यज्ञस्याभिगरौ॥अयास्य
उङ्गाता॥वाचस्पतेहृदिधेनामन्॥विधेमतेनामाविधेस्वमस्माकंनाम॥वाच
स्पतिःसोममपात्॥मादेव्यःस्तुभ्छेदिमामनुष्यः॥नमोदिवेनमःपृथिव्यैस्वाहा॥
वाचस्पतेब्रह्मणइदं॰ततोदर्शपूर्णमासस्थालीपाकप्रधानकृदिसमापयेत्॥ स्या
वैश्वानरस्थालीपाकस्तूदर्शपूर्णमासस्थालीपाकेनसहैकतंत्रेणकुर्यात्॥त
त्राप्यादौवैश्वानरचरुहोमः॥पश्चात्प्रकृतस्थालीपाकप्रधानहोमादिकुर्यादि

तियाग्निकाः॥अमाश्राद्धकरणेप्रायश्चित्तमुक्तमग्निधाने॥न्यृषुवाचंजपेन्मं
त्रंज्ञातवारंतुतद्दिने॥अमश्राद्धंयदानास्तितदासंपूर्णमेतितदिति॥तथा॥न्यृषित्यस्य
सव्यरंद्वस्त्रिष्टुप्॥ममामाश्राद्धाकरणेप्रायश्चित्तजपेवि॰।न्यृषुवाचंप्रमदेवि
वस्वतः॥न्यृचिद्दि॰ज्ञास्यतेइतिज्ञातवारंजपेत्॥एतदज्ञातपरं॥अथयुगादिश्राद्धा
करणेप्रायश्चित्तमग्निधाने॥नयस्यद्यावामंत्रंचज्ञातवारंतदाजपेत्॥युगादयो
यदान्यूनाःकुरतेनैवचापरीति॥नयस्यद्यावेत्यस्यरेणुरग्निस्त्रिष्टुप्॥ममामुकयु
गादिश्राद्धाकरणवैगुण्यनिरासार्थंज्ञातावत्याजपेवि॰।ॐनयस्यद्यावापृथिवी॰सो
मोअस्मा॥॥यदस्यमन्यु॰स्थिराणि॥तथा॥मन्वादिश्राद्धाकरणेप्रायश्चित्तमग्निधाने राम॰
त्वंभुवःप्रतिमंत्रंतुज्ञातवारंजलेजपेत्॥मन्वादयोयदान्यूनाकुरुतेनैवचापरीति॰ ४२

य२

त्वंभुवइतिमंत्रस्यकक्षीवांदैर्घ्यतमसोविश्वेदेवास्त्रिष्टुप्॥ममामुकमन्वादिश्रा
द्धाकरणवैगुण्यनिरासार्थंजलेज्ञातवारंजपेविनि०॥ॐत्वंभुवःप्रतिमानंपृथि॰
व्याः॥विश्वमाप्राअंतरिक्षं॰स्त्वावान्॥इत्यंचंजपेत्॥अथद्रव्यशुद्धिः॥दीपोमल
मूत्रपुरीषलोहितरेतोभिरुपहतंचतद्रव्यंप्रक्षालनाच्छुध्येत्।अश्रुचिनास्पृष्टं
वस्त्रंप्रोक्षणाच्छुध्येत्॥अजिनंवासःसूत्रंवाप्रक्षालितमुत्तरीयंकुर्यान्नाप्रक्षालि
तं॥अप्रक्षालितंनवंवस्त्रंआधानदीक्षासुपरिक्षालितंनवंवस्त्रंकर्मसुनो
पयुंज्यात्॥पुरोयुक्तंकृष्णाजिनंवस्त्रंवानोपयुंज्यात्॥वेद्यांमूत्रादिभिरुपहता
यामुपहतदेशाभ्यामिष्टकाचेद्गोमयादिरूपलेपनाच्छुध्येत्॥मृडभस्मापिभद्दाचे
त्कर्षणोपलेपनाच्छुध्येत्।अर्धायांवेद्यांमूत्राद्युपहतायांउपरिष्टात्प्रदेशात्पुरीष

त२

मुधस्यमेध्यामदन्यतआहृत्यपरधित्वाउपलेपनाकुर्य्यात्॥अल्पंतोपहृतायांकर्षणादिकृत्वागोभिराक्रमणंवननदहनादिभिःकर्षणादिभिर्व्यस्तैर्वाशुध्येत्॥अल्पोपहृतंचेदुपलेपनसोमसूर्य्योष्णनामारुतैश्चशुध्येत्॥उपहृतायांभस्मौउपलेपनादिसंस्कृतानांकुशोध्मादीनांप्रक्षालनाछुद्धिः॥यज्ञार्थंस्रुवादिभिराहृतानांकाष्ठपात्रादीनांअभ्युक्षणाछुद्धिःअंगुलीप्रमाणस्फ्यानांसमिधामल्पोपहृतोप्रोक्षणाछुद्धिः॥मन्त्राद्युपहृतानांत्यागएव॥आर्द्राणांसत्वक्कानांउपघातेतक्षणाछुद्धिः॥जुहूदीनांदारुमयपात्राणांबुद्धिपूर्वकमुच्छिष्टपुरीषस्पृष्टानामवलेखनप्रोक्षणाछुद्धिःअजकूक्कुटेनस्पर्शेतदवद्यं॥उच्छिष्टपुरीषेणाबुद्धिपूर्वकंस्पृष्टानांदारवाणांतक्षणप्रोक्षणाछुद्धिः॥अल्पंतोपहृतानांतक्षणासमर्थानांमंत्रेणपात्रांतरंगृहीत्वाभूरायु

क्षा

र्मेत्यभिमंत्र्योपहृतमप्सुप्रक्षिपेत्॥भूमिर्भूमिमगादितिसादितानांपात्राणामिध्मावर्हिःप्रभृतीनामपिमन्त्राद्युपहृतानांत्यागएव॥अग्निहोत्रेघर्मोच्छिष्टेदधिघर्मेकुंडपायिनामयनेउत्सर्गिणामयनेरोपणयज्ञेचातुर्मास्येब्रह्मोदनेग्निहोत्रहविष्यादीनामुच्छिष्टसमन्वारब्धानामुच्छिष्टलेपोपहृतानांचदर्भैःप्रक्षालनमेवग्रैचमसानांउच्छिष्टचमसमन्वारब्धानामुच्छिष्टलेपोपहृतानांचाद्भिर्मार्जयेद्दर्भैःप्रक्षालनाछुद्धिः॥मन्त्राद्युपहृतानांत्यागएव॥यात्रांतरस्वीकारश्च॥॥मन्मयाद्याज्यस्थाल्यादीनामल्पोपहृतानामुच्छिष्टसमन्वारब्धानांचकुशाग्निनादहनाछुद्धिः॥उच्छिष्टलेपोपहृतानांमन्त्राद्युपहृतानांत्यागः॥पात्रांतरपरिग्रहश्च॥तैजसानांकुंडयपुरीषादीनां उच्छिष्टोपहृतानांसकृद्गोमयैःप्रक्षालनाछुद्धिः॥ताम्रमयीमुच्छिष्टाल्पोपहृतानांसकृद्गोमयैःशुद्धिः

रजतकांचनयोः अद्भिरेवप्रक्षालनाच्छुद्धिरिति॥विशिष्टमन्त्रायुपहृतानामग्नौप्रतापना
च्छुद्धिः॥अयस्मयानांतैजसादिवच्छुद्धिः॥पात्रभाजनानांबिल्वकपित्थमयानामलां
बुपात्राणांवेणुवेत्रकृतानांगोमयाद्भिःप्रक्षालनाच्छुद्धिः॥व्रीह्यादीनांसतुषद्रव्याणांचां
डालादिस्पर्शोपहतानांद्रोणन्यूनपरिमाणानांप्रक्षाल्यवस्त्रशोषणाच्छुद्धिः॥द्रोणाधिकप
रिमाणानांप्रोक्षणाच्छुद्धिः तंडुलानामुदक्यादिभिः स्पृष्टानांशुद्धपात्रांतरेषुअनयना
च्छुद्धिः॥द्रोणन्यूनानामुत्सर्गः॥द्रोणाधिकानांस्पृष्टदेशस्तावन्मात्रत्यागात्प्रोक्षणाच्छु
द्धिः॥चरुपुरोडाशादीनामुदक्यादिभिर्दृष्टानांत्यागः॥पयोदधिघृतादीनामुच्छिष्टसमन्वा
रब्धपात्रोपहृतानांशुद्धपात्रांतरेष्वानयनाच्छुद्धिः॥पयोदधिघृतादीनामुच्छिष्टोपहृता
नांत्यागः॥शुद्धभांडस्थितानांपयोदधिमध्वाज्यादीनांशुद्धपात्रांतरेष्वानयनाच्छुद्धिः॥आ

पणस्थद्रव्याणांविक्रय च्छुद्धिः॥अग्निहोत्रद्रव्येतैलसर्पिःपयोदध्यादावुच्छिष्टसम
न्वारब्धानांपात्रांतरेष्वानीयोरकेननिधायाग्निहोत्रमुपयुंज्यात्॥शौचदेशद्रव्यमंत्रव
दर्थसंस्कारकालानांअशक्तानांहयोर्हयोर्विरोधस्यप्राबल्यंपरस्परंदौर्बल्यमिति॥इतिप्रा
यश्चित्तप्रदीपेऽशुद्रव्यशुद्धिः॥ ॥प्रयोगपारिजातेतु॥ ॥अथेदानींकर्मणितुप्रयुज्य
मानानांपात्रादीनामुच्छिष्टोपहतौकागतेरित्यपेक्षायांआचार्यादिनिरूपितरीत्यायावदुप
युक्तंशुद्ध्यंते॥ ॥इत्याश्वलायनाचार्यः॥ ॥दारवादिषुशुद्धेषुयद्दूसंस्पंदनाभिःशु
द्धिर्नवतितापेनमन्मयानांतथाग्निना॥आस्येनशुद्धिस्ताम्रस्यकांस्यानांभस्मनाभवेत्
नवसंस्पर्शनाच्छुद्धिरायसानांप्रक्षालनात्॥स्त्रीशूद्रशुद्धपात्राणिकांस्यादीन्यपिवर्जये
त्॥सौवर्णराजतादीनांराद्धात्प्रक्षालनाच्छुचिरिति॥विज्ञानेश्वरोपि॥ ॥सौवर्णराजतता

शंखशुक्तिदृषदु खलमुसलचमसप्रोक्षणपात्रप्रभृतीनांदारुमयानांचस्पर्शे
जिर्नोचविलेपमुच्छिष्टस्पर्शेवारिप्रक्षालनाच्छुद्धिः॥तथारूक्कसुवादीनामलेपानां
वारिभिःप्रक्षालनंयथाविधिपुनःसंमार्जनाच्छुद्धिः॥एतेषांकाकादि कृष्णशकुनिमु
खावमर्शेद्विलेखनाच्छुद्धिः॥मार्जारव्यतिरिक्तश्वामुखावमर्शेपरित्यागः॥मललेपि
नांतुतैजसमण्यश्ममयानांसर्वेषामपिभस्मनामृदावासंघृष्यजलैःप्रक्षालनाच्छुद्धिरि
ति॥ ॥प्रयोगपारिजातेउक्तद्रव्यशुद्धिः॥ ॥अथाहुःकर्मण्यकृतानिचेत्तानिराज्ञाः
प्रथमयामेयथाक्रमंकर्त्तव्यानि॥दिवोदितानिकर्माणिप्रमादादकृतानिच॥यामिन्याः
प्रथमेतानिकुर्याद्वैयथाक्रममितिविष्णुस्मृतौउक्तं॥ ॥यथा॥दिवोदितानिक
र्माणिप्रामुवंत्युत्तराणिच॥दिवोदितानिकृत्वैवविदध्यादुत्तराणिचेत्याचारत्नेस्म

ताउक्तेश्च॥तत्रस्नानविधिनास्नानंब्रह्मयज्ञंसौरंचवर्जयित्वान्यानिकुर्यात्॥रात्रौप्र
हरपर्यंतंदिवाकर्माणिकारयेत्॥अवगाहंचसौरंचब्रह्मयज्ञंचवर्जयेत॥इत्यांगिर
सोक्तेः॥तथा॥दिवोदिताःक्रियाःकार्यारात्रावपियथाक्रमं॥अवगाहंविनासौरंब्रह्म
यज्ञंचतर्पणं॥इतिस्मृतिसंग्रहेउक्तेश्च॥अत्ररात्रावपिनव्याःकेचित्सर्वथामेब्रह्मय
ज्ञमिछंति॥तज्जयेतास्वलायनादिभिःप्राचीनैरुक्तं॥उदयोत्तरमस्तमयात्प्रध्येवब्र
ह्मयज्ञःकर्त्तव्यइत्युक्तं॥तदुत्तरंब्रह्मयज्ञाकरणप्रायश्चित्तमेवकुर्यात्॥तदुक्तंपर्व
मेवकारिकायां॥एतेभ्यःपंचयज्ञेभ्योयस्येकोपिहीयतेमनस्वित्याद्युक्तिस्तत्रप्रायश्चि
त्तंविधीयतइति॥मध्याद्वसंध्यातुरात्रावपिकर्त्तव्या॥कुर्वीतावर्त्तनींसंध्यांरात्रावपिन
दुष्यति॥दघादर्घंतुगायत्र्यासौरमात्रंतुवर्जयेदितिस्मृतिरत्नावल्यामुक्तेः॥एतद्भा

रात्रं॰ ४५

यत्र्यार्घ्यदानमाश्वलायनातिरिक्तविषयं॥आश्वलायनैस्तूक्तकृष्णायवैर्वार्घ्यत्रयं
दत्वागायत्र्याकालान्तिमघायश्चित्तार्घ्यदानंकर्त्तव्यं॥यदिदिवोदितानिकर्माण्यकृता
नियावत्प्रहरंयामिन्यास्तावत्क्रमेणैवसर्वाणिसौरंवर्जयित्वाकुर्यादाकृष्णायवैर्वार्घ्यं
दद्यादितिगृह्यपरिशिष्टोक्तेः॥सौरस्नानेतुसौरवैश्वानरीयंजपेत्॥मध्याह्नसंध्या
रात्रौचेत्प्रमादान्निष्पद्यतेयदि॥सौरस्नानेजपेत्सूक्तंसौर्यवैश्वानरीयकंइतिस्मृति
संग्रहोक्तेः॥सौर्यवैश्वानरीमर्कं॥हरिष्यंतमजरंस्वर्विदंत्येकोनविंशदुक्थमर्कं
बोध्यं॥रात्रावग्निंप्रज्वाल्यस्नायादितिस्मृत्यर्थसारः॥रात्रिस्नानेतुसंकल्पाघमर्ष
णमार्जनजलतर्पणगोपीचंदनधारणंवर्जयेदितिउक्तं स्मृतिमंजर्यां॥इतिरात्रौप्र राम·
र्वयमेदिनकर्मणांकर्त्तव्याकर्त्तव्यनिर्णयः॥कर्मसमाप्तिसमयेंगलोपेज्ञातेअज्ञाते ४६

वाप्रायश्चित्तमाहप्रजापतिः॥प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत्॥स्मरणादेव
तद्विष्णोःसंपूर्णंस्यादितिश्रुतिः॥प्रायश्चित्तान्यशेषाणितपःकर्मात्मकानिवै॥या
नितेषामशेषाणांकृष्णानुस्मरणं परमिति॥॥उक्तंकर्मयथाकालेदिवाकर्त्तुन्न
शक्य ते॥अकालेवापितत्कुर्याड्ढेंघाप्यपकृष्यवा॥१॥आदि
त्येस्तमितेयावत्तारकादर्शनंनहि॥सायंहोमंतदाकुर्यान्नोचेत्स्युर्नवनाडिकाः॥२॥
नित्यहोमेतुपत्नीस्याच्छ्वश्रूचैवतुसंनिधौ॥अग्न्याधानंतदाकुर्याद्वह्न्यादिकंस्व
यं॥॥३॥विच्छिन्नवह्निसंधानंसहपत्न्याचमन्त्रयेत्॥निर्वपेच्चतुरोमुष्टींस्तानेवप्रो
क्षयेदथ॥तंडुलानवहन्यास्त्रीन्कृत्वातांस्त्रिःफलीकृतैः॥त्रिःप्रक्षाल्यपचेदग्नौ
उदक्चैवाज्यभाजने॥४॥विस्रस्येधंतथाबर्हिर्निदध्याज्यसमेचते॥॥इतिआ

श्वलायनस्मृतौ॥ ॥दर्शाभ्यांसायंविधिः॥ ॥एवंगुण॰पुण्यतिथौ॥श्रीपरमेश्व॰अद्यसा
यंश्वः प्रातःश्वः सायंपरश्वः प्रातः एवंद्यहःसमस्येनयज्ञेद्यहाहैकेतित्रिकांडमंडन
स्थसूत्रवाक्यबलात्॥प्रवासेवाग्निहोत्रीयस्त्रिपंचाहमप्रसन्नवा॥दातव्योहोमएका
हेसायंप्रातःपृथक्पृथक्॥इतित्रिकांडमंडने॥कात्यायनः॥असमक्षंतुदंपत्योर्हो
तव्यंनर्त्विगादिना॥द्वयोरप्यसमक्षंतुभवेच्छ्रुतमनर्थकमिति॥स्वयंपर्वणिजुहुयाद्
त्विजश्चान्यकालके॥शौनकः॥पौर्णमासीतिसंप्राप्तायाविवाहादनंतरं॥ततःप्रक्र
म्यकुर्वीतस्थालीपाकंतुपर्वसु॥तत्रयद्यप्यमावास्याविवाहानंतरंपतेत्॥तथापि
पौर्णमास्यादिःस्थालीपाकक्रियास्मृता॥बौधायनोपि॥सायंप्रातःक्रियाणांतुसा रां॰
यमारंभइष्यते॥पौर्णमासस्यदर्शस्यप्रारंभःपौर्णमासतः॥छ॥संग्रहः॥यत्रकाष्ठं ४७

तत्रकर्णौकुनेचेह्याधिकृन्नरः॥धूमस्थानंशिरःप्रोक्तंमनोदुखंभवेदिह॥यत्राल्प
ज्वलनंनेत्रंयजमानस्यनाशनं॥भस्मस्थानेतुकेशःस्यात्स्थाननाशोधनक्षयः॥अं
गारेनासिकांविंद्यान्मनोदुखंविदुर्बुधाः॥यत्रप्रज्वलनंतत्रज्ञेयंचैवप्रकीर्त्तिता
॥गजवाजिप्रणादीतुवह्निःशुभफलप्रदइति॥ ॥छ॥ ॥अद्यप्रभृत्याश्व॰शुभति
थौ॥अद्यसायमारभ्यचतुर्दशीसायंकालपर्यंतान्शेषहोमान्यजमानाज्ञयातंडुलद्
व्येणहोष्ये॥अद्यप्रातरारभ्यअमावास्याप्रातःकालपर्यंतान्यजमानाज्ञयाप्रातरौप
सनहोमंतंडुलद्व्येणशेषहोमंकरिष्यइतिसंकल्पः॥ ॥दिवाकरेणरचितास्मार्त्तनि
ष्कृतिपद्धतिः॥गुणग्राह्यैर्बुधैः सम्यगादरेणविभाव्यतां॥ ॥इतिश्रीमत्कालोपना
मकभट्टरामेश्वरात्मजभट्टमहादेवद्विजवर्यसूनुभट्टदिवाकरविरचितस्मार्त्तप्रा

स्मा॰प्रा॰ ४८ यश्चित्तोद्धारेसंक्षिप्तप्रयोगरूपेणनित्यनैमित्तिकप्रायश्चित्तानिकारिकादुक्तानि निरूपितानि॥ ॥शुभंभवतु॥॥इतिस्मार्तप्रायश्चित्तानिसमाप्तानि॥

थाल्युपनामकनागेशभट्टात्मजरोषभट्टस्येदंपुस्तकं॥

रोम॰ ४८

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥इतिस्मार्तप्रायश्चित्तानि॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY